Subject—*Mantras* appertaining to the worship of Devi.

Beginning :

... ... पूजनं कृत्वा तु ... ... जुहुयात् . . .व्रीहयः ।
पायसमोदनमश्वत्थं जुहु ... ... ।
... ...।
तण्डुलं तिलसम्मिश्रं जुहयात् सघृतं रहः ॥
समिद्भिः क्षीरवृक्षस्य जुहुयाद् दूर्वया सह ।
प्रत्यहं जुहुयादेवं मासं पक्षमथापि वा ॥
सर्वरोगविनिर्मुक्तो जीवेद्वर्षशतं नरः ।
आयुरारोग्यमैश्वर्यं विजयं चाशु सिध्यति ॥

End :

उत्तिष्ठ पुपि ज्वल ज्वल हृदयाय नमः। किं स्वपिपि प्रज्वल प्रज्वल शिरसे स्वाहा। भयं मे समुपस्थितं । ज्वलिनि शिखायै वषट्। यदि शक्यमशक्यं वा कलादिभिः कवचाय हुम्। भगवति शमय ठठ त्रिशूलिनि अस्त्राय फट्। ज्वालाचण्डदुर्गमहादुर्गायै नमः क्रक।

कालपावकसन्निभां कलिता...चन्द्रशिरोरुहां (?)
फालनेत्रविभूषितां भयदायिसिंहनिषेदुषीम् ।
चर्मशङ्खकृपाणखेटकचा(पा?पवाण)करोटिकां
शूलपाशभुजां भजेद्विजिताखिलासुरसैनिकाम् ।

Colophon :

इति श्रीवनदुर्गाकल्पे त्रयोदशः पटलः ।

Author :

Remarks—The Ms. covers *paṭalas* 5—13. A few leaves in the middle are missing. The codex is much damaged. Certain verses are explained here in Malayāḷam as well.

॥ दुष्टग्रहबाधापरिहारः (भाषामिश्रः) ॥

1045. DUṢṬAGRAHABĀDHĀPARIHĀRA.

Substance—Palm leaf. Size—8″ × 2″. Leaves—27. 7 lines per page and 21 letters per line. Script — Malayāḷam. No. of Granthas—243. Incomplete.

Subject—Necromancy.

Beginning :

ഹരിഃ കാലുകഴുകി ആചമിച്ചു പലകമേൽ ഇരുന്നാൽ ഭൂത ശുദ്ധി ചൈത ശംഖപൂരണഞ്ചൈയ്യു ആത്മാരാധനം ചൈവും. പിന്നെ അ...ലാടി വിളാകിപ്പുരിസ്ഥരിച്ചു അജ്യ സംസ്കാരഞ്ചൈത സ്രുക്സ്രുവസമ്മാജ്ജനഞ്ചൈതു ഗണ പതി നിവേദിച്ചു വിളാകി ആരാധിച്ചു ചാഞ്ചമത ഹോമിച്ചു ജ്ഞസപനാദി-സമിദ്ധം വിശ്വതോമുഖം ഈ വണ്ണം അഗ്നി മുഖം കഴിഞ്ഞാൽ പൂവാരാധിച്ചു താലത്രയാദി ദിഗ്ബന്ധ നഞ്ചൈതു പീഠം പൂജിപ്പു.

गुं गुरुभ्यो नमः । गं गणपतये नमः । आधारशक्त्यै नमः । अनन्ताय नमः । ... ... व्य नमः । इक्षुसमुद्राय नमः । श्वेतद्वीपाय नमः । रत्नमण्डप ... ... कल्पकवृक्षाय नमः । धर्माय नमः । ज्ञानाय नमः । वैरा ... ... ऐश्वर्याय— अधर्माय— अज्ञानाय— अ ... ... ाग्याय— अनैश्वर्याय ।

പിന്നെ മണ്ഡലത്രയം.....ത്രയം-പിന്നെ നവശക്തി തീവ്രായൈ നമഃ...ായിന്യൈ...നന്ദായൈ ഭോഗദായൈ കാമരൂപിണ്യൈ നമഃ ... ...

End :

अन्तरात्मने नमः । परमात्मने नमः । सर्वजनस्य ... ... पायसु यो यः जिह्वतिलय बुद्धि विना च विहंग हा फट् स्वाहा ।

ഉരുജപിക്ക ശത്രുഹരം ഓം. ചെഞ്ചെമം രവാമുകാരി ഗഞ്ചരവത്ത പുറത്തിവ ഭദ്രയപ്പാമാസ്വാഹാ ഇതഎഴുതി മടിറതലെയ്ക്കൽ കെട്ടുകയും മന്ത്രം കൊണ്ടെണ്ണ ജപിച്ചു കൊടുക്കയും ആവാം ജപിച്ചുകൊടുക്കയുമാം. ഓം ബ്രഹ്മശാന്തിനികാവിഷ്ണുശാന്തിനി ഈശ്വരശാന്തിനി കജത്തിനാൾ ചിറകെട്ടിപ്പി. ... ...

Colophon :

Author :

Remarks—The Ms. points out the rites of worshipping Viṣṇu to ward off the influences of evil planets etc., and the purificatory rituals connected therewith. The following few sentences occur at the end :

കുവളം കതളിപ്പഴം പഞ്ചസാരയും പാലും വിത്തു ഇതിന്റെ ഗുണം അസ്ഥിസ്രാവം ശമിക്കും. വിഷ്ണുക്രാന്തിയും നിലപ്പനക്കിഴങ്ങും തുളസീവേരും ചുക്കും ഇവ സമംകൊണ്ടു

കഷായം കുടിക്ക പനിതീരും. ത്രിക്കോൽപ്പകൊന്നയും ചുക്കും കടുക്കായും ഇന്ദ്രപ്പും കൂട്ടിപ്പൊടിച്ചു വെന്നീറനിൽ കുടിക്ക മലംപോം മോരും ചോറും.

॥ देवपूजाप्रतिष्ठास्नानाविधिः (भाषामिश्रः) ॥

1046. DEVAPŪJĀPRATIṢṬHĀSNĀNAVIDHI.

Substance—Palm leaf. Size—16″ × 2″. Leaves—137. 10 lines per page and 61 letters per line. Script—Grantha. No. of Granthas—3875.

Subject—Worship of Viṣṇu, Śiva etc. and the religious celebrations connected therewith.

Beginning:

हरिः ।

हरीशाहमीशं कुमारीं कुमारं गणेशं प्रभेशं च नंनम्यमानः ।
प्रवक्ष्यामि तन्मन्त्रविम्बे समिज്യां विशुद्धिक्रमं स्नाननर्मोसवं च ॥

വിഷ്ണുവിനേയും ശിവനേയും ശങ്കരനാരായണനേയും ദുർഗ്ഗയും സുബ്രഹ്മണ്യനേയും ഗണപതിയേയും ശാസ്താവിനേയും ക്രമത്താലെ നമസ്കരിച്ചിട്ടു തന്ത്രബിംബത്തിങ്കലെ പൂജയും ശുദ്ധിക്രമത്തേയും സ്നാനകർമ്മത്തേയും ചൊല്ലും ശ്രദ്ധ.

स्नात्वाचम्य निषद्य यागसदने संवन्द्य गुर्वादिकान्
कृत्वा हस्तविशोधनादिमपरप्राणानुरोधावधि ।
देहं कारणया विशोध्य विधिवद्वाय्वग्निवार्बीजतो
लिप्यायम्य समीरणं करयुगे देहे च तां विन्यसेत् ॥

End:

त्रियम्बकाय शर्वाय शंकराय शिवाय च ।
सर्वलोकप्रधानाय शाश्वताय नमो नमः ॥

തളിപ്പാനും തന്നേ ബലിതൂക്കുവാൻ—

ब्रह्मभूतेन्द्रगन्धर्वयक्षरक्षःपिशाचकाः ।

കൊടിനാട്ടി മൂളയിട്ടാൽ അ.....യും പൂജിച്ചു് ശ്രീഭൂത ബലിയും തൂകു. അന്ന ഒന്നേ ശ്രീഭൂതബലിവെണ്ടു. പിറെ ന്നാഠം തുടങ്ങി ഈരണ്ടു. ത്രികാലപൂജയും ചെയ്യണം. ഉച്ച ക്കു നവകം വേണം. ഉൽസവബലി വേണ്ടുകിൽ പ്രതീതെ ത്തെ ശ്രീഭൂതബലിയും സ്ഥാനത്തുക്കു ... .

Colophon :

इति क्रियासारे अष्टादशः पटलः ।

Author :

Remarks—Lacunæ are marked off and on in the course of the work. Only the *Patalas* 18 and 19 of *Kriyāsāra* are embodied in the codex. 20 leaves of different dimensions deal with topics like *Sampātaspar'sa*, *Praṇava* etc. The last leaf furnishes the following information:

"പാലെ കുറഞ്ഞി മരുതു് മുല്ലൈ നൈതലെണ്ടു ശൊല്ല പ്പെട്ട ദിക്കിലും അറിയും പടികടിയപാർ ഉള്ളവിടം. കുറിഞ്ഞി പെരുമണൽ ഉള്ളവിടം. നൈതൽ ഇളമണൽ വാരുള്ള വിടം. മുല്ലൈ ശെണ്ണൈന്തവിടം മരുതു വെള്ളച്ചൂലൊടൈ പാലനിലം ഇതിൽ നൈതൽ നിലവും കുറിഞ്ഞി നിലവും നീ രില്ലൈ പാലനിലവും മുല്ലൈ നിലവും മരുതു നിലവും നീരു ണ്ടെൻറ ചൊല്ലുവതു-നിലക്കരുവറിയുംപടി. . . ..

॥ ध्यानपद्धतिः ॥

1047 A. DHYĀNAPADDHATI.

Substance—Palm leaf. Size—11" × $1\frac{3}{4}$". Leaves—27

8. 9 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—216.

Subject—Details connected with the meditation on Hari.

Beginning :

अथ संग्रहेण कथयामि हरेः प्रतिपत्तिमाशु भवमुक्तिकरीम् ।
सरसीरुहोद्भवमुखामलसन्मतिचित्ररङ्गभुवि नृत्तपराम् ॥
... ...
.....सप्तमोऽथो नवी...काख्यः सुरपादपेन्द्रः ॥
यो धर्मशास्त्रस्य महावतारः श्रीकृष्णचन्द्रस्य निषेवणाय ॥
हरस्य चिन्त्यो हरिचन्दनाख्यो हरित्यथान्त्यः सुरदारुवीरः ।
पुराणपूरुषः परां हि मूर्त्तिं यं प्राहुरिष्टार्थकविं मुनीन्द्राः ॥
सम्भूय चैते सुरपादपेन्द्रास्तक्षैव तात्पर्यवतामराणाम् ।
कृष्णास्तथा मण्डपवर्यभावं समागताः श्रीधरशासनेन ॥

End :

स्तुतिवन्दनसामादिनृत्तगीतादिकैरपि ।
सर्वैश्च हृदयाम्भोजे पृथक् पृथगहर्निशम् ॥
यथोक्तपरिवाराढ्यो भगवान् समुपास्यते ।
अनेन मार्गेण हरिं हृदम्बुजे विचिन्तयेद् योऽनुदिनं नरोऽनिशम् ।
स वत्सरेणैव महत्तमां गतिं प्रयाति कान्या सुविचारणा भवेत् ॥
अशक्तता चेदिति चिन्तने स्याज्जपेदजस्रं स विशुद्ध एतत् ।
तत्राप्यशक्तस्तु शृणोतु भक्त्या तयोरपि स्यादचिरेण सिद्धिः ॥

Colophon :

गुर्वागमाभ्यां प्राप्तयमात्म....ध्यानपद्धतिः ।
राघवानन्दसंज्ञेन पद्यमार्गे निवेशिता ॥

श्रीकृष्णाय नमः ।

Author—Rāghavānandamuni.

Remarks—The first leaf is missing. Then 37 leaves following the completion of the work are devoted to the exposition of *Gopālamantra* which is separately catalogued as No. 1047 B.

॥ गोपालमन्त्रः ॥

1047 B. GOPĀLAMANTRA.

Substance—Palm leaf. Size—11″ × 1¾″. Leaves—37. 8—10 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—1110.

Subject—Explanation of Nyāsa relating to Gopālamantra and the meditation thereon.

Beginning:

श्रीगणपतये नमः । अविघ्नमस्तु ।

स्वदेहद्वारकापुर्यां स्वजीवहरिविग्रहे ।
स्वमात्मानं हरिं ध्यात्वा हरिरेव हरिर्भवेत् ॥

श्रीगोपालकमहामन्त्रराजस्य न्यासध्यानपूजाक्रमः संप्रदायानुसारेणाविस्मृत्यै संक्षेपात् ... ... । तत्रायमुपदेशसारसर्वस्वसंग्रहः । आत्मीयमेव देहं सर्वेश्वरस्य भगवतो वासुदेवस्य सदानन्दचिद्घनस्यावासभूमिं द्वारकां परिकल्प्य स्वजीवात्मकमन्त्रमयपरचैतन्यकविग्रहे ब्रह्मादिमशकान्तसर्वप्राणिधीवृत्तिसाक्षिणमात्मानं परब्रह्मभावेनादेहपातान्नैरन्तर्येण ध्यात्वा

पूर्वमपि ब्रह्मैव सन्नब्रह्मात्मभ्रममवधूय ब्रह्मैव सम्पद्यत इति । तत्रायमनुष्ठानक्रमः । ब्राह्मे मुहूर्ते प्रबोधसमय एवात्मानं सर्वात्मानं वासुदेवमभिध्यात्वा तल्पतलादुत्थाय श्रीगुरुदुर्गा-गोविन्दान् प्रणम्य निर्गम्य स्नानादिकं सकलपौर्वाह्णिकं निर्वर्त्य सपर्यामण्डपमनुप्रविश्य नृसिंहबीजेन भूतानुत्सार्य तत्र सन्नि-धापितमात्मन आसनं ... ... विष्णुबीजमुच्चार्य अमृतवर्षिण्या दृष्ट्या समवलोक्य ... ...

End :

सकलसंसारमहानर्थजालमात्मानमेव परमेश्वरमनुभवन् नाना-प्रारब्धभोगक्षयान्मुख्यब्राह्मणो भूत्वा सुखं संचरति । तदन्ते च परमकैवल्यं लभते । तदेतदभिप्रेत्योक्तं हरिरेव हरिर्भ-वेदिति । श्रीकृष्णाय नमः । हरिः ।

Colophon :

Author :

Remarks—This work is a commentary on No. 1047 A.

॥ नृसिंहादिमन्त्रकल्पः ॥

1048 A. NṚSIMHĀDIMANTRAKALPA.

Substance—Palm leaf. Size—16¼″ × 2″. Leaves—35. 7 lines per page and 54 letters per line. Script—Malayāḷam. No. of Granthas—827.

Subject—Same as No. 1047 B.

Beginning:

नारायणवासुदेवात्मकानि दत्त्वा किरीटमन्त्रेण पुष्पाञ्जलिं कृत्वा परिवारानर्चयेत् । रुक्मिणीसत्यभामा ... ... भद्र घटपुष्पमञ्जरीभिः प्रथमावृत्तिः । अङ्गैः द्वितीया। रुक्मिण्यादिभिः तृतीया । वासुदेवादिभिः चतुर्थी । वसुदेवादिभिः पञ्चमी । मन्दाराद्यैः षष्ठी । पद्मादिनिधिभिः सप्तमी । षोडशसाहस्रभार्या (वे भासतु देवाभ्यर्च्य?) केशवादिद्वादशमूर्तिभिरष्टमी । मत्स्यादिदशावतारैर्नवमी । पुनरिन्द्रादि वज्रादि ऐरावतादि दिग्गजाश्चेति द्वादशावृत्तिः । पुष्पाद्यैरभ्यर्च्य केवलैरेव पुष्पैः पुष्पत्रैविध्यं कुर्यात् ।

End—Same as No. 1047 B.

Colophon:

Author:

Remarks—The first leaf is missing. The two leaves at the end are detailed for explaining *yantras*. The title of the work is evidently based on the colophon "इति नृसिंहमन्त्रकल्पे" found on one of the leaves of a different treatise, inserted in this codex relating to Gopalamantra. The other works dealt with in the Ms. are separately catalogued.

॥ श्रीराममन्त्रकल्पः ॥

1048 B. ŚRĪRĀMAMANTRAKALPA.

Substance—Palm leaf. Size—16¼" × 2". Leaves—12,

7 lines per page and 58 letters per line. Script —Malayāḷam. No. of Granthas—250.

Subject—*Mantras* appertinent to the worship of Śrī Rāma.

Beginning:

विघ्नेशवन्दनं जीयाद्विघ्नविघ्नविनाशनम् ।
स यस्याकराणान्नूनं विघ्नितार्थगजाकृतिः ॥
गमं नमामि विश्वेशं व्याख्यामुद्रालसत्करम् ।
वसिष्ठवामदेवाद्यैर्मुनिभिः परिवारितम् ॥
कृष्णद्वैपायनं व्यासं गुरुं सत्यवतीसुतम् ।
समाधिस्थं मुनिं शान्तं प्रसन्नादित्यतेजसम् ॥
गङ्गातीरे महापुण्ये समासीनं तपोनिधिम् ।
शौनकः परिपप्रच्छ साष्टाङ्गं प्रणिपत्य च ॥
मयि प्रसादप्रवणं भगवन् कुरु मानसम् ।
करुणारसपूर्णाभ्यां लोचनाभ्यां विलोकय ॥
त्वत्प्रसादान्महामन्त्रा विज्ञाता बहवो मया ।
सच्चिदानन्दमात्मानं ज्ञातवान् ब्रह्म शाश्वतम् ॥
इदानीं ज्ञातुमिच्छामि मन्त्रं साङ्गं सहार्चनम् ।
रामात्मनावतीर्णस्य विष्णोरमिततेजसः ॥

End:

गन्धेषु मायाश्रीबीजे कोणाग्रेषु तनुच्छदम् ।
शेषं सर्वं यथापूर्वमस्मिन् वा पूजयेद्धरिम् ॥
आकाशमन्त्रीशन्तीन्दुसंयुतं भुवनेश्वरीम् (?)।
वक्रः पावकशान्तीन्दुसंयुतो मामसीरितम् ॥

क्रोधीशो भूमिसंस्थस्य शान्तीन्दु स एकः स्मरः (?)
मेरुरग्नीन्दुमनुभिर्भूषितो नरसिंहराट् ॥
उक्तान्येतानि बीजानि सर्वकामार्थदानि हि ।
नानाजन्मार्जितैः पुण्यैर्ज्ञात्वैवं रघुनन्दनम् ॥
यो भजेदुक्तमार्गेण स भवेत् सप्तसंपदाम् ।
भवसन्तापशमनं विविधानन्दवर्धनम् ॥
यः पठेच्छृणुयाद्वापि स गच्छेत् तत्पदं सुखी ।

Colophon :

इति श्रीराममन्त्रकल्पः समाप्तः ।

Author :

Remarks—A lacuna is perceptible in the middle owing to the decayed condition of the leaves. Besides, many other topics such as *Hamsahoma*, *Prapañcayāgakrama*, *Sāmbhavakrama* etc. are dealt with herein.

॥ श्रीरामविश्वरूपस्तोत्रम् ॥

1048 C. ŚRĪRĀMAVIŚVARŪPASTOTRAM.

Substance—Palm leaf. Size—16¼″ × 2″. Leaves—7. 8 lines per page and 56 letters per line. Script —Malayāḷam. No. of Granthas—200.

Subject—A panegyric of Śrī Rāma.

Beginning :

श्रीगणपतये नमः । बृहस्पतिरुवाच याज्ञवल्क्यं—यदनु कुरुक्षेत्रं देवानां देवयजनं सर्वेषां ब्रह्मसदनं तस्माद् यत्र क्वचन गच्छेत्

तदभिमन्येताविमुक्तो देवानां देवयजनं सर्वेषां भूतानां ब्रह्मसदनम् । अत्र हि जन्तोः प्राणेषु उत्क्रममाणेषु रुद्रस्तारकं ब्रह्म व्याचष्टे । येनासावमृती भूत्वा मोक्षी भवति । तस्मादविमुक्तमेव निषेवेत । अविमुक्तश्चेत्येवमेवैष भगवान् याज्ञवल्क्यः ।

End :

इत्युक्त्वा रामचन्द्रोऽपि सम्प्रपूज्य महेश्वरम् ।
ब्रह्मादित्रिदशैः सर्वैर्विससर्ज समन्वितम् ॥
अर्चिता मानिताश्चैव नरनाथाश्च वानराः ।
विसृष्टा रामचन्द्रेण प्रीत्या परमया युताः ॥

इत्थं विसृष्टाः खलु ते च सर्वे
स्वं स्वं पदं जग्मुरतीव तुष्टाः ।
वरं परं तत्स्तवमीश्वरोक्तं
रामं स्मरन्तो नरविश्वरूपम् ॥

श्रीरामाय रामाय नमः ।

Colophon :

इति श्रीपद्मपुराणे श्रीवेदव्यासभीष्मसंवादे श्रीरामविश्वरूपस्तोत्रं नाम एकशततमोऽध्यायः ।

Author :

Remarks—A leaf at the end contains the diagram of Śūlinī. The colophon denotes that the work is a portion of *Padmapurāṇa*.

॥ पञ्चाक्षरादिमन्त्राः पञ्चदशाक्षरीस्तोत्रद्वयं च ॥

1049. PAÑCĀKṢARĀDIMANTRA & PAÑCADAŚĀKṢARĪSTOTRADVAYA.

Substance—Palm leaf. Size—5″×1½″. Leaves—48. 12 lines per page and 20 letters per line. Script — Malayāḷam. No. of Granthas—550.

Subject—Śaivaic *mantras.*

Beginning:

... ...त्मासनाय नमः। ह्स क्लीकीलिरिडीं ह्सकिलितडौं श्रीमहात्रिपुरसुन्दरीज्ञानप्रकाशनाय विद्यासिंहासनाय नमः। ह्सक्ष्मलर्प्रींह्सक्ष्मलप्रीं ह्सक्ष्मलव्यौं श्रीमहात्रिपुरसुन्दरीपुष्पतूलिकायै नमः। ह्रीं श्रीं ऐं क्लीं सौः ह्रीं श्रीं प्से श्रीमहात्रिपुरसुन्दरी आनन्दमूर्तये नमः। वज्रनखवज्रदंष्ट्रायुधाय महासिंहाय नमः।

महापद्मवनान्तस्थे कारणानन्दविग्रहे।
सर्वभूतहिते मातरेह्येहि परमेश्वरि॥

End:

हुंकारबीजं रुचिमद्विचिन्त्य
प्राणान्नियम्यात्र निवेश्य चित्तम्।
तद्रेचकान्तोक्तफडन्तमन्त्रान्
ग्रन्थिप्र... .... शो विदध्यात्॥

अस्त्रशब्देन पाशुपतास्त्रेणेति यावत् ....ये ग्रन्थयः पञ्चतमोलघिष्ठाः हृत्कण्ठतालु.... ....

Colophon :

Author :

Remarks—The leaves are not consecutively arranged. The margins bearing the page numbers are completely decayed. According to the revised catalogue MPL., the work is known as *Pañcāksarādimantra*. But it opens with "त्रिपुरसुन्दरिमन्त्र" and contains various Śaiva mantras. The other appended work, *Pañcadaśāksarīstotradvaya* lacks the beginning and the end.

॥ पार्वत्युपासनाक्रमः ॥

1050. PĀRVATYUPĀSANĀKRAMA.

Substance—Palm leaf.. Size—8″×1½″. Leaves—30. 6—8 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas—300.

Subject—Worship of Pārvatī.

Beginning:

हेमाद्रौ हेमपीठस्थितिमखिलसुरैरीड्यमानां विराज-
त्पुण्ड्रेक्षिवष्वासपाशाङ्कुशकरकमलां रक्तवेषातिरिक्ताम् ।
दिक्षूद्यद्भिश्चतुर्भिर्मणिमयकलशैः पञ्चशक्त्यञ्चितैः स्व-
र्वीक्षैः कूलप्लाभिषेकां भजत भगवतीं भूरिदामन्त्ययामे ॥

നാലാംയാമത്തിനു ധ്യാനമിതു.

End :

ह्रींकारत्रयसंपुटेन महता मन्त्रेण संदीपितं
स्तोत्रं यः प्रतिवासरं तव पुरो मातर्जपेन्मन्त्रवित् ।
तस्य क्षोणिभुजो भवन्ति वशगा लक्ष्मीः स्थिरस्थायिनी
वाणी निर्मलसूक्तिभारभरिता जागर्त्ति दीर्घं वयः ॥

Colophon :

इति श्रीविद्यामनुध्यानं समाप्तम् ।

Author :

Remarks—The *mantras* contained in this Ms. are of an esoteric nature. The codex opens with the Dhyāna on Śrī Vidyāmantra. Then, the Aṅganyāsa of Śrī Vidyā and the verses on its Dhyāna are quoted. Next occur Gaurīdhyāna in Malayāḷam, and the Lipinyāsa and Dhyāna pertaining to Mahātripurasundarī. The Pratibhāsarasvatī is noticed later *inter alia* with the statement "കാളിദാസൻ സേവിച്ച് വിദ്യാകവിതപമുണ്ടായി. ബുദ്ധിഗുണമുണ്ടാം" at the close wherefore Kālidāsa might be supposed to have been a devotee of Pratibhāsarasvatī.

॥ प्रणवकल्पः ॥

1051 A. PRAṆAVAKALPA.

Substance—Palm leaf. Size—13″ × 1½″. Leaves—10. 9 lines per page and 44 letters per line. Script—Malayāḷam. No. of Granthas—250.

Subject—Exposition of Ṛṣi, Chandas etc. relating to *Pranava*.

Beginning:

श्रीगणपतये नमः। अविघ्नमस्तु।

यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै।
तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये॥

अथ प्रणवानुष्ठानं संगृह्यते—याममात्रावशिष्टायां रजन्यां ओं नित्यप्रतिबुद्धाय परमात्मने नम इति प्रबोधमन्त्रेण प्रणवेन वा प्रबोधमासाद्य ओं विद्यादेहाय परमात्मने नम इति प्रणवेन वा विद्यामयं देहं संगृह्य स्वनाम्ना स्ववाक्येन हंसस्सोहमर्थेन प्रणवेन च ब्रह्मात्मनोरेकत्वं प्रतिपद्यानुज्ञाप्रणवेनानुभूय ओं ब्रह्मादिभ्यो गुरुभ्यो नम इति मूर्ध्नि संवन्द्यानिद्रे स्वात्मनि कञ्चित्कालमवस्थाय ओं गतदिनकृतं तद्दिने करिष्यमाणं च तत्सर्वं ब्रह्मार्पणं भवतु स्वाहेति समर्प्य... ... ... मूर्तिंचतुष्टयं पूजयेत्।

End:

स्थूलसूक्ष्मयोः कारणसंहारयोगः। चिच्याप्तिचिन्तमोतयोगः(?)। द्वैतस्य कल्पितत्वेन चिदधिष्ठानसत्ताप्रतीतित्वचिन्तनम् अनुज्ञातृयोगः। पुनर्द्वैतस्य चिदव्यतिरेकेणासत्वाच्चितोऽविकारित्वाच्चितोऽचिन्तनमनुज्ञायोगः। पुनरपि कृतत्वादिधर्मराहित्यचिन्तनं निर्विकल्पयोगः।

Colophon:

... ...प्रणवकल्पः।

Author;

Remarks—The other works found in this Ms. are separately noticed below.

॥ त्रैलोक्यमोहनमन्त्रः ॥

1051 B. TRAILOKYAMOHANAMANTRA.

Substance—Palm leaf. Size—13″×1½″. Leaves—3½. 8 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—85.

Subject—*Mantra* for the attainment of desired objects.

Beginning :

धर्मवित्तसुखमोक्षफलार्थी योषितामपि नृणां प्रवरं यत् ।
मन्त्ररत्नमतिगुह्यमिदानीं वक्ष्यते मतिमतामतिरम्यम् ॥
दौर्भाग्यव्याधिदारिद्र्यजराशोकभयातुराः ।
भर्तृदाराभिभूताश्च स्त्रीविघ्नार्तास्तदीप्सवः ॥
पुत्रभूम्यर्थिनो युद्धजयकामाश्च वञ्चिताः ।
हृतार्थाः क्लिष्टसंसारापथ्यसंवननार्थिनः ॥
विलमन्ध्यर्थिनश्चैव ह्यन्तर्धानाभिकाङ्क्षिणः ।
शत्रुभिः परिभूताश्च सर्वविघ्नैरुपद्रुताः ।
मारणोच्चाटनद्वेषस्तम्भनाकर्षकाङ्क्षिणः ॥
भजेयुः सर्व एवेमं मन्त्रं त्रैलोक्यमोहनम् ।

End :

इति जपहुतपूजाध्यानकैः श्रीधरं यो
(जय?यज)ति स तु समग्रां सम्पदैश्वर्यलक्ष्मीम् ।

वरयुवतिसुपुत्रं प्राप्य लोकैकवन्द्यो
व्रजति पदमनन्तं लोकवन्द्यस्य विष्णोः ॥

Colophon :

Author :

Remarks—The Ms. deals with the rites concerning the *Trailokyamohanamantra.*

॥ प्राणप्रतिष्ठामन्त्रविधिः ॥

1051 C. PRĀṆAPRATIṢṬHĀMANTRAVIDHI.

Substance—Palm leaf. Size—13″ × 1½″. Leaves —1½. 9 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—35.

Subject—*Mantra* for Prāṇapratiṣṭha.

Beginning :

प्राणप्रतिष्ठानमनोर्विधानं. . .वक्ष्यते संप्रति सर्वसिद्ध्यै ।
यस्मादृतेऽमी कथिताः प्रयोगा व्यर्थाभवेयुर्गतजीवितत्वात् ॥
ब्रूयात् पूर्वममुष्यशब्दमथ च प्राणा इह प्रा ... ...
तद्वज्जीव इह स्थितेति च पदं सर्वेन्द्रियाणीति च ।

तद्वद्वाङ्मनसी दृशः श्रुतिमथो प्राणश्च सप्राणकं
मेंहवागमयत्ययुक्सुख (?) ... ... न्तिष्ठन्तु ठद्वितम् ॥
मन्त्रस्याम्य विधिर्हरिश्च हर इत्येते मुनित्वे स्थिता-
श्छन्दश्चर्य्यजुषं ससामकमथो त्रिच्छन्दसं वा भवेत् ।

End :

प्राणप्रतिष्ठाविधिरेवमुक्तः साङ्गः सुयागो विनियोग उक्तः ।
अस्मिन् प्रवीणो गिरिकाननादीन् प्रचालयेत् किं पुनरात्मयुक्तान् ॥
प्राणाग्निहोत्रामिलनास्त्रमणिप्रयोगं भोगांश्च यागसकलंकरणं मनूनाम् ।
एतानि सम्यगधिगम्य गुरूपदेशान्मन्त्री तु साधकवर-
[स्त्विह साधयेच्च ॥

Colophon :

Author :

Remarks—The work deals with the method of consecrating idols of various deities by means of *mantras*.

॥ उपहारशुद्धिः ॥

1051 D. UPAHĀRAŚUDDHI.

Substance—Palm leaf. Size—13⅓″ × 1½″. Leaf—1. 9 lines per page and 95 letters per line. Script—Malayāḷam. No. of Granthas—12.

Subject—Purification of the five elements in the human body.

Beginning :

पञ्चभूतात्मिका दिव्याः शक्तयो मधुविद्विषः ।
रसनादेर्दक्षिणांशान्निर्गत्य (लि?ग)ळिता बहिः ॥
आदायाञ्जलिना दिव्या (?)भूतसूक्ष्माण्यनुक्रमात् ।
वामांशेन प्रविश्यान्तश्चिन्मूर्तौ सर्वकारणे ॥
समप्र्याशु विलीयन्ते तस्मिन् सकलनिष्कले ।
तत्र सौम्यप्रयोगेषु सौम्योऽसौ स्वपदानतम् ॥

End :

निर्गत्याञ्जलिनादाय दीपं ब्रह्माण्डसम्मितम् ।
तेजःस्वरूपिणी कन्या द्योतयन्ती दिशो दश ॥
विशेद्वामाक्षिमार्गेण स्वात्मानमिति चिन्तयेत् ।
क्षित्यात्मके निवेद्ये तु जलातत्वात्मके परे ॥
अर्पिते मूलमन्त्रेण रसनायां जगत्पते ।
निर्गत्य निजमार्गेण कन्यका जलरूपिणी ॥
सुधात्मकञ्च दण्डाभं परमानन्ददीपितम् ।
आदायाञ्जलिना माया प्रविश्य निजवर्त्मना ॥
स्व लीना स्वयमित्येव ध्यायन्नेन पूजयेत् ।
एवं समर्पितैरेतैरुपहारैर्महेश्वरः ॥
आप्नोति परमां प्रीतिं सर्वसिद्धिकरीं पराम् ।

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीसत्यानन्दविरचितोपहारपरिशुद्धिः संपूर्णा ।
सुब्रह्मण्यनारायणेन लिखितमिदं पुस्तकम् ।

Author—Śrī Satyānanda.

Remarks—The Ms. describes the powers attributed to the five elements on Vaiṣṇavic lines.

॥ प्रपञ्चसारविवरणम् ॥

1051 E. PRAPAÑCASĀRAVIVARAṆAM.

Substance—Palm leaf. Size—13½" × 1½". Leaves—

112. 9 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—3000.

Subject—The basic principles of the *mantraśāstra*.

Beginning:

अवर्णविग्रहं देवं वर्णविग्रहवर्णितम् ।
वर्णविग्रहवेत्तारं नमामि स्तौमि संश्रये ॥

इह खलु लोकानुग्रहैकरसतया कृतशरीरपरिग्रहो भगवान् शङ्कराचार्योऽपरोक्षीकृतपरदेवतात्मतत्त्वः परमां विभूतिकाष्ठां प्राप्तः स्वयमेकाकी सम्पदा लज्जमानो दुःखिजनकारुण्याक्रान्तमानसश्च संस्तदनुग्रहाय समस्तागमसारसंग्रहप्रपञ्चसारसंग्रहरूपं ग्रन्थं चिकीर्षुरभिमतसकलप्रयोजनसिद्धये प्रथमतः परदेवतातत्त्वानु(स्मि)रणमाशीर्लक्षणञ्च मङ्गलमाचरन् ग्रन्थारम्भौपयिकं विषयादिकमप्यर्थात् सूचयति—अकचटतपयाद्यैरित्यादिना....

End:

कलायुतैरिति । षोडशमूर्तयः केशवाद्याः । अष्टाक्षरवदिति । ओं नमश्शिवाय स्वाहा ओं नमश्शिवाय स्वाहा इत्यादिक्रमेणाक्षरैर्हुत्वा ओं नमश्शिवाय स्वाहेत्यपि पञ्चवारं जुहुयादित्यर्थः । हुताहुतिसंख्यामाह । पञ्चाहुतीनां मित्रवर्णसंख्यमिति । एकपञ्चाशत्संख्यातमित्यर्थः । अपदानद्वितयमिति । भागद्वयादाविमलं कप्रमाणं हविरादायमि(?)... ...कृत्यापदानद्वयं बीजैरात्मशब्देन नामभिश्च भूतमनवः स्युरित्यर्थः । लं पृथिव्यात्मने नमः । इत्यादयो भूतमनवः ।

Colophon:

इति प्रपञ्चसारविवरणे षट्त्रिंशः पटलः । प्रपञ्चसारविवरणं समाप्तम् ।

यत्कटाक्षवशादेव मोहजालो विशीर्यते ।
तस्मै निरस्तमोहाय नमः कृष्णाय साक्षिणे ॥

Author—Text: Śaṅkarācārya.

Remarks—The work is an elaborate commentary on *Prapañcasāra*. It is identical with R. No. 7939 p. 5732, Vol. XV, DCSM., Madras. The last three leaves contain certain *yantras*.

॥ प्रत्यङ्गिरःकार्तवीर्यादिमन्त्राः ॥

1052. PRATYAṄGIRAKĀRTAVĪRYĀDIMANTRA.

Substance—Palm leaf. Size—7″ × 1¼″. Leaves—157. 6 lines per page and 16 letters per line. Script — Malayāḷam. No. of Granthas—950. Incomplete.

Subject—A compendium of *mantras*.

Beginning:

कांसोस्मितां सहा चैव पावमानी च देविका ।
गन्धद्वारां च दूर्वा च मनसः कामभृङ्गिका ॥
स्योना पृथिवी च वाराही तद्विप्रासो विष्णुपर्णिका ।
दधिक्राविष्णः सदाभद्रा लक्ष्मीदेवी श्रियेति च ॥
इन्द्रश्रेष्ठा हि इन्द्रवल्ली हिरण्यवर्णा कृताञ्जली ।
यागं धूर्जटिनयनं त्रयोदश द्वे च सप्तमनुरूपाः ॥
रविवसुदिक्क्रमभागाः तेषां योगाः.....

End:

हिरण्मयीं हृदयाय नमः । मन्द्रायै शिरसे स्वाहा । रजतस्रजायै शिखायै वषट् । हिरण्यै कवचाय हुम् । हिरण्यवर्णायै नेत्रत्रयाय वौषट् । हिरण्याक्षी अस्त्राय फट् । श्रीराम ... ... कर्दयश्चिक्लतेदिरामिताः? ऋषयः । अनुष्टुबृहती तृष्टुबनुष्टुबौ प्रस्तारपङ्क्तयश्छन्दांसि । श्रीरग्निर्देवते । श्री ... ... ।

Colophon:

Author:

Remarks—This Ms. embodies a collection of *mantras* bearing upon Pratyaṅgiras, Kārtavīrya, Varāha, Hanumān, and Lakṣmī.

॥ प्रपञ्चसारः ॥

1053. PRAPAÑCASĀRA.

Substance—Palm leaf. Size—11″ × 1½″. Leaves—45. 9—10 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas—1075.

Subject—Same as No. 1051 E.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

अकचटतपयाद्यैः सप्तभिर्वर्णवर्गै-
र्विरचितमुखबाहापादमध्याख्यहृत्का ।
सकलजगदधीशा शाश्वती विश्वयोनि-
र्वितरतु परिशुद्धिं चेतसः शारदा वः ॥

अथाभवन्ब्रह्महरीश्वराख्याः पुरा प्रधानात्प्रळयावसाने ।
गुणप्रभिन्ना जगतोऽस्य सृष्टिस्थितिक्षयस्पष्टनिविष्टचेष्टाः ॥

End:

रक्षाकरस्तु करिणां तज्ञापितपञ्चगव्यलेपः स्यात् ।
आज्यतिलराज्यनित्यकदुग्धोदनपञ्चगव्यतण्डुलकैः ॥
सघृतैश्च प्रत्येकं सहस्रहवनं गजाश्ववर्धनकृत् ।
द्विजभूरूहं महान्तं छित्त्वा निर्भिद्य पञ्चधा भूयः ॥
आशाक्रमेण पञ्चायुधा विधेयाद(?)साधु शिल्पविदा ।
शङ्खस्सनन्दकोऽरिः शार्ङ्गः कौमोदकी दिशाक्रमशः ॥
पञ्चेति पञ्चगव्ये हि... ... ...

Colophon:

इति प्रपञ्चसारे नवमः पटलः ।

Author—Śaṅkarācārya.

Remarks—The Ms. consists of 9 *patalas*. The text is continued in three leaves even after the close of the 9th *patala*. Twelve leaves preceding the last three are missing. The work is published by the V. V. Press, Śrīraṅgam.

॥ प्रपञ्चसारादिसारसंग्रहः ॥

1054. PRAPAÑCASĀRĀDISĀRASAṄGRAHA.

Substance—Palm leaf. Size—7″ × 9″. Leaves—70.

12—15 lines per page and 36 letters per line.
Script—Malayāḷam. No. of Granthas—1300.

Subject—A compendium of Prapañcasāra etc.

Beginning:

नत्वा श्रीशङ्कराचार्यममरेन्द्रयतीश्वरम् ।
कुर्वे प्रपञ्चसारस्य सारसंग्रहमुत्तमम् ॥

तत्र यत्प्रपञ्चसारे शङ्कराचार्यैरुक्तं मन्त्रयन्त्रप्रयोगादि तत्सर्वमपि सारभूतमेव, तथापि इदानीं मन्दप्रज्ञानां विस्तरशो ज्ञातुमनुष्ठानञ्च ज्ञातुमशक्यत्वादत्यन्तोपकारभूतत्वेन यत्सारतरं तदल्पग्रन्थेनैव यथा सर्वमन्त्रयन्त्रतन्त्रसारग्रहणं स्यात्तथा सर्वतः सारं गृहीत्वा मया सत्सम्प्रदायसर्वस्वाभिधानव्याख्यानोक्तमार्गेण वक्ष्यते । तत्र पुनः प्रसङ्गात् तत्र तत्र मन्त्रकल्पान्तरे मन्त्रसारक्रमदीपिकासनत्कुमारीयशारदातिलकमन्त्रदेवताप्रकाशिकादौ यद्यन्मन्त्रतन्त्रयन्त्राद्युक्तं तदपि किञ्चित्किञ्चिद् वक्ष्यते ।

End:

ॐ भगवादुपोपहाररूपेण अकारवाच्ये रुद्रे उपसंहृत्य तमपीत्यादि नम इत्यन्तं ओं भगवादुपोपहाररूपेण मकारवाच्ये रुद्रे उपसंहृत्य तमपीत्यादि नम इत्यन्तं भगवन्धूपोपहाररूपेण बिन्दुवाच्ये ईश्वरे उपसंहृत्य तमपीत्यादि नम इत्यन्तं ओं भगवन् दीपोपहारात्मना सुकृतदुष्कृतं तत्सर्वं दीपोपहाररूपेण नादवाच्ये सदाशिवे उपसंहृत्य तमपीत्यादि नम इत्यन्तं ओन्नै....

Colophon:

Author—Gīrvāṇendrasarasvatī, a disciple of Viśveśvarasarasvatī, who was a pupil of Amarendrasarasvatī. (Vide p. 5734, DCSM., Vol. XV).

Remarks—The work is an epitome of several treatises on *mantra* such as Mantrasāra, Mukundayajanakramadīpikā, Sanatkumārīya, Śāradātilaka, Mantradevatāprakāśikā etc. It extends up to Puṣpāñjalimantra. The introductory portion credits the author with the composition of सत्संप्रदायसर्वस्व.

॥ प्रयोगाविजयसारावली ॥

1055. PRAYOGAVIJAYASĀRĀVALĪ.

Substance—Palm leaf. Size—8″ × 2″. Leaves—114. 6—8 lines per page and 26—32 letters per line. Script—Malayāḷam. No. of Granthas—1350. Incomplete.

Subject—Details regarding the means of expelling the evils befalling humanity.

Beginning :

श्रीदेव्युवाच

नमस्ते भगवन् शंभो नानात्मज्ञगतां पते ।
शरभेशोपकल्पाख्यं श्रोतुमिच्छामि सांप्रतम् ॥

शिवः

कल्याणि साधु ते गुह्यं कामितार्थप्रदं परम् ।
कस्य यस्य शृणु त्वं च कथयामि वरानने ॥

शरभेशोपकल्पाख्यं चण्डमायाधिदैवतम् ।
साधु प्रयोगविजयमारावलिरिति स्मृतम् ॥
मणिमन्त्रौषधोपेतं मरणापत्तिभञ्जनम् ।
नानामयहरं दिव्यं नानासिद्धिप्रदायकम् ॥

End:

सा(न्ध्य?ध्य)स्य भ्रमणस्थाने मारणाद्यष्ट .....।
योगं जपेद् बुधो देवि तत्प्रयोगार्थसिद्धये ॥
विशेषेण महायुद्धे शत्रुसेनाकुले भुवि ।
संधार्य यन्त्रराजं तु तत्र देवीमनुं जपेत् ॥
तद्यन्त्रावेशना(त्रोच्छत्रोः) सेना नश्यन्ति निश्चयः ।

Colophon:

इति श्रीप्रयोगो नाम अष्टात्रिंशः पटलः ।

Author:

Remarks—The work is composed in the form of a dialogue between Pārvati and Parameśvara. The Ms. concludes with the 38th *patala*. It is also known as Śarabheśopakalpa.

॥ बहुदैवत्यम् ॥

1056 A. BAHUDAIVATYAM.

Substance—Palm leaf. Size—20″ × 2¼″. Leaves—34. 9 lines per page and 50 letters per line. Script—Malayāḷam. No. of Granthas—956. Complete.

Subject—An account of the consecratory rites.

Beginning :

गणपतये नमः ।

सर्वज्ञत्वं जगति विदि(ताःतं) भोक्तृतां सर्वभोगे
तृप्तत्वं वा विहितकरणे दातृतां वा फलस्य ।
साकल्यं वा ... ... क्यारवाप्त्यै
स्वीकुर्वाणं प्रणमत शिवं देवता यत्स्वरूपम् ॥

धातुर्नियमपात्रस्था ततो विष्णुपदं गता ।
गङ्गा वराङ्गे न्यपतद् यस्य दे .... ॥

.... काशनिकाशकान्ति-
द्विजाधिराजस्फुरितोत्तमाङ्गः ।
पायात् फणारत्नमरीचिमाला-
लसन्महाभोगिविभूषितो वः ॥

End :

गुरुस्तैः कलशैः कुर्याद्बलिपीठाभिषेचनम् ।
ततो देवं समाराध्य .... ॥

... ... षु तत्र समीरितः ।
एवं यः पूजयेन्नित्यं देवानीश्वरपूर्वकान् ॥
तन्प्रसादात्समाप्नोति सर्वान् कामान .... ।
.... चन् भुवा ।
नारायणेन तन्त्रेषु सारमर्थं विचिन्वता ।
प्रोक्तेश्वरादिदेवानामर्चनक्रम .... ।
.... बहुदैवत्यनामिका

Colophon :

इति बहुदैवत्ये चतुर्विंशतिपटलः ।

इति बहुदैवत्यं समाप्तम् ।

Author—Nārāyaṇa.

Remarks — A prose composition in Malayāḷam appended at the end of the Ms. is catalogued separately as No. 1056 B.

॥ आख्यायिकाविशेषः ॥ ഉണ്ണിയച്ചീചരിതം

1056 B. ĀKHYĀYIKĀVIŚEṢA.

Substance—Palm leaf. Size—20″ × 2½″. Leaves—39. 6 lines per page and 52 letters per line. Script—Malayāḷam. No. of Granthas—800. Incomplete.

Subject—A narrative composition.

Beginning :

ദിതചിലർ പന്നിയുമടിത്തളിർവലമായി അറയിലെരിഞ്ഞ
രുണിതവിഭുമമുടഞ്ഞാണപനവിനവുകിലരയായരയരമപ്പുരിക
ലയാകുലിതപുലിന്തൊലിയായാല്മലയൊഭിയറതിലൊടലം മല
യാഹകുളിപുരുഷ്മമലചുമടാല്നതനടുവംഞ്ഞാരിടമതാവിമ
ലലസത്യസിതന്തിരടിരുമാവ്വൊരിടമതായ്പുരവിജയെ നിജവ്രത
തമ്മായമഹാഗിരിമയവില്പിടിമാ.....

ചെംങ്ങിനമുദുകൈത്തലവിവശംവപുരൊരുപാടനുപമമഖിലമ
ച്ചിലയെ വല്ലിച്ചുടനൊരുതൊള്ളുവുവരുപും.

End:

ജഗതികുതുഹലമെല്ലൊരഞ്ജൌസപ്പ്ഭാന്തികണക്കെ.....
രുതാഞ്ചിതരുതെവീചെറുമുറ..... ...ന്തില്മുക്താഃബുദ്ധിവരി..
തുശ്ശുക്തൌരജത ഭൂപിമ ഇവദു..... ലതാസത്തായാ...കസ്സിലാ
ന്ത.....ന്യാം. കുത ഇതീ പബഹുലാസം വ്യവഹാരഭിയാ.....
ദവന്ദ്വിവിധാന്ദൃഷ്ടി സഹസ്രപഥെ സപിടഗ്വെഭിഃ മാണി
കാലംകഴിവതിനു..... ... ...

Colophon:

Author:

Remarks—The work commences on the 3rd Fol. with the description of the town of Tirumarutūr. References are frequently made to one Uṇṇiacci, probably the heroine. The Ms. is much decayed. The diction employed is an admixture of old Malayāḷam and Sanskrit.

॥ भद्रकाळीशूलिन्यादिमन्त्राः ॥

1057. BHADRAKĀḶĪŚŪLINYĀDIMANTRA.

Substance—Palm leaf. Size—6″ × 1½″. Leaves—39. 5—6 lines per page and 10—20 letters per line. Script—Malayāḷam. No. of Granthas—200. Complete.

Subject—*Mantras* pertaining to Bhadrakāḷī etc.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

कमलासनाय नमः । ॐ ब्रह्मविष्णुशिवात्मकाय प्रेतासनाय हुं फट् नमः । ओं ह्रीं ह्रीं ह्रैं क्लीं सौं ह्रीं भद्रकाल्यै नमः ।

എന്ന മൂന്നുരുചൊല്ലി പിന്നെയും ओं ओं ह्रीं ह्रीं एह्येहि भद्रकालि आगच्छ പിന്നെ ആവാഹനംകൊണ്ടു ആവാഹിതാ ഭവ സംസ്ഥാപിതാ ഭവ സന്നിരുദ്ധാ ഭവ സുപ്രസന്നാ ഭവ സാന്നിധ്യം കുരു കുരു.

End :

उन्मत्तभैरवाय नमः । कपालभैरवाय नमः । भीषणभैरवाय नमः । संहारभैरवाय नमः । सर्वाङ्गेभ्यो नमः । सर्वाक्षरेभ्यो नमः । सर्वायुधेभ्यो नमः । सर्वाभरणेभ्यो नमः । सर्वपरिवारेभ्यो नमः । सर्वपरिवारायुधेभ्यो नमः । ह्रीं शेषिकायै नमः । ओं श्रीमहामोहनि श्रीकाममोहनि श्रीमहालक्ष्मि ।

യൻ വശമായിരിക്ക സ്വാഹാ

Colophon :

Author :

Remarks—The Ms. contains the *mantras* relating to Bhadrakāḷī and Śūlinī with comments in Malayāḷam.

॥ भुवनाधिपतिमन्त्रकल्पः ॥

1058 A. BHUVANĀDHIPATIMANTRAKALPA.

Substance—Palm leaf. Size—9½″ × 2″. Leaves—33. 8—9 lines per page and 30 letters per line. Script—Malayāḷam. No. of Granthas—557.

Subject—*Mantras* conducive to the attainment of the desired ends.

Beginning :

हरिः श्रीगणपतये नमः । पार्वत्युवाच—
देवदेव महादेव सर्वज्ञ कथितं सदा ।
रहस्यं वेदशास्त्राणां मन्त्रयन्त्रादिरूपकम् ॥
यन्मन्त्रं तु जपेन्नित्यं इहलोके परत्र च ।
अगतिर्गतिमाप्नोति अणिमाद्यष्टसिद्धिदम् ।
सर्वविद्याप्रबोधश्च वाचास्सिद्धिं प्रयच्छति
तदङ्ग सर्वमखिलं वक्ष्यतां परमेश्वर ॥
ईश्वर उवाच—
साधु साधु महाप्राज्ञे सन्तोषो मम जायते ।
सारात्सारतरं विद्यात् त्रैलोक्यविजयप्रदम् ॥
पुनस्मदाशिवेनोक्तं मन्त्रिणी भुवनेश्वरि ।
ब्रह्मा ब्रह्मत्वमाप्नोति रहस्यं सर्वकामदम् ॥
अस्य मन्त्रस्य प्रभावेन विष्णुर्विष्णुत्वमाप्नुयात् ।

End :

अथवा सप्तरात्रं वा त्रिरात्रं वापि पूजयेत् ।
शङ्खपद्मनिधिभ्यां च सप्तद्वीपाधिपो भवेत् ॥
तस्मात् सर्वप्रयत्नेन पूजां कुर्यात्सभक्तिमान् ।
साधयेन्मन्त्रमेतं वा गुरुपूजापुरस्सरम् ॥

Colophon :

इति भुवनाधिपत्ये मन्त्रकल्पे त्रयोदशः पटलः ।
श्रीमहादेव्यै नमः । श्रीमद्राजराजेश्वर्यै नमः ।

ക്ലൗം ലളിതാംബികായൈ നമഃ ।

Author :

Remarks—The Ms. consists of 13 *patalas* only. The last six leaves embody a few holy *mantras* noticed under No. 1058 B.

॥ शान्त्यधिकारः ॥

1058 B. ŚĀNTYADHIKĀRA.

Substance—Palm leaf. Size—9½" × 2". Leaves—6. 8—9 lines per page and 30 letters per line. Script—Malayāḷam. No. of Granthas—95.

Subject—Expiatory *mantras*.

Beginning :

श्रीगणपतये नमः ।

अतः परमिदं पुण्यं रुद्रोद्गीतं महोदयम् ।
महाविघ्नप्रशमनं महाशान्तिकरं शुभम् ॥
अकालमृत्युशमनं सर्वव्याधिनिवारणम् ।
परचक्रप्रशमनं सदा विजयवर्धनम् ॥
स्तम्भनं परसैन्यस्य रिपुसादकरं भवेत् ।
सर्वदेवग्रहानीतं समस्ताभीष्टदायकम् ॥
सर्वशान्त्यधिकाराख्यं धर्मं वक्ष्यामि शाश्वतम् ।

End :

अनेकयक्षसंकीर्णा महारक्तोपशोभिता ।
तत्र देवो गदाहस्तश्चित्रस्रग्वस्त्रभूषणः ॥
ह्रस्वबाहुर्महातेजाः परिपिङ्गललोचनः ।
कुबेरवरदः श्रीमान् हरपादार्चने रतः ॥

शान्तिं करोतु मे प्रीतः शान्तः शान्तेन चेतसा ।
यशोवती ... ...

Colophon:

Author:

Remarks—The Ms. is fairly accurate.

॥ मन्त्रपारायणश्रीचक्रन्यासरहस्यविद्यानुष्ठानक्रमः ॥

1059. MANTRAPĀRĀYAṆAŚRĪCAKRA-NYĀSARAHASYAVIDYĀNUṢṬHĀNAKRAMA.

Substance—Palm leaf. Size—12¼" × 2". Leaves—19. 15 lines per page and 64 letters per line. Script—Malayāḷam. No. of Granthas—934.

Subject—Details regarding the recital of *mantras*.

Author:

Beginning:

अथ पारायणविधिः । अहमनहंसः । इहमनहंसः । ईहमनहंसः । इत्यादिक्रमेण क्षहमनहंस इत्यन्तं एकपञ्चाशद्विद्या ....
... ... अयं ब्रह्माणि वर्गः ।

श्रीगणपतये नमः ।
मृद्वासने समासीनः प्राङ्मुखः शुद्धमानसः ।
बध्वा पद्मासनं विद्वानृजुकायः समाहितः ॥
यथादृष्टमनुस्मृत्य स्वगुरूनभिवादयेत् ।
आधारशक्त्या बाहुभ्यां स्वासने विन्यसेत्ततः ॥

त्रिखण्डमुद्रया मूर्ध्नि समुद्धृत्य विन्यसेद् गुरून् ।
वामांसे गणपं वन्देत्तदूरौ क्षेत्रपं तथा ॥
दक्षोरौ योगिनीश्चापि तदंसे बटुकभैरवम् ।
अस्त्रेण बाहुतलयोः पृष्ठयोश्चापि विन्यसेत् ॥

End:

अरुणमरुणवासोमाल्यदामाङ्गरागं
मकरकलितपाशं साङ्कुशास्त्रेक्षुचापम् ।
मणिमयमकुटाद्यैर्दीप्तमाकल्पजातै-
रुरुणनलिनसंस्थं चिन्तयेदङ्गयोनिम् ॥

काममन्त्रस्य ।

Colophon :

Remarks—The Ms. comprises Mantrapārāyaṇa-vidhi, Śrīcakranyāsa, Rahasyavidyānuṣṭhāna-krama etc. The mystic diagrams are also noted herein.

॥ मन्त्रानुष्ठानक्रमः ॥

1060 A. MANTRĀNUṢṬHĀNAKRAMA.

Substance—Palm leaf. Size—8″ × 2″. Leaves—94. 6 lines per page and 30 letters per line. Script—Malayāḷam. No. of Granthas—1058.

Subject—Same as No. 1059.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

अथ महागणपतेरनुष्ठानप्रकारः कथ्यते । यं रं वं ओं ह्रीं आधारशक्तिकमलासनाय नमः । एतानासने विन्यस्य तत्रोपविश्य ओं ह्रीं हं परमशिवाद्यशेषगुरुपारंपर्यक्रमेण स्वगुरुपादाम्बुजं यावत्तावत् प्र ... ... ञ्जलिना शिरस्यभिवाद्य ओं गुरुभ्यो नमः । ओं गं गणपतये नमः । ओं ह्रीं दुं दुर्गायै नमः । ओं पं परमात्मने नमः ।

End :

इदमेव यन्त्रं मोहने । योगपदं विशेषः । मारणे चतुरश्रेऽपि कुलिशाष्टकं बीजद्वयमध्ये तं बहिः अङ्गं कुर्यात् । उच्चाटनयन्त्रे विद्वेषणयन्त्रमेव निग्रहयन्त्रं शत्रूणां द्रव्येषु यमिच्छति तमेव नियोगपदं विधाय निग्रहयन्त्रमेव कुर्यात् । एवं सप्त यन्त्राण्यालिख्य तत्तत्कर्म कारयेत् । आधिवश्यमन्त्रं पूर्ववत् । ओंकारद्वयमध्ये ह्रींकाराङ्कितत्रिकोणं लिखेत् । तत्र उपरि पद्मकोणेषु कोणाष्टदळशतदळपद्मद्वय(च)तुरश्रं विधाय चतुरश्रेषु ... ... ब्जं मः इति वामावर्तेन लिखेत् ।

Colophon :

Author :

Remarks—The Ms. includes the various rites regarding the worship of Gaṇapati, Vāgdevī etc. and other *mantras* on wizardry. 7 leaves at the end are devoted to the explication of *mantrasāra* and the last three contain certain esoteric *mantras*. The last portion is separately catalogued as No. 1060 B.

॥ गुह्यतममन्त्राः ॥

1060 B. GUHYATAMAMANTRA.

Substance—Palm leaf. Size—8″ × 2″. Leaves—3. 7 lines per page and 30 letters per line. Script —Malayāḷam. No. of Granthas—30.

Subject—The application of certain esoteric *mantras*.

Beginning :

हरिः श्रीगणपतये नमः । अविघ्नमस्तु ।

महितमुक्तिकलालयमिष्टदं
महिषमूर्ध्नि लसत्पदपङ्कजम् ।
मनसि मे मधुसूदनसोदरं
स्फुरतु धाम महेश्वरजीवितम् ॥

अथैकदा सुखासीनं ध्यायन्तं ब्रह्म शाश्वतम् ।
कृतहोमाच्यराजां व(?)स्वाध्यायाद्यखिलक्रियम् ॥
भस्मोद्धूलितसर्वाङ्गं त्रिपुण्ड्रोज्ज्वलमस्तकम् ।
अक्षमालाकृतोत्तंसग्रैवेयवलयादिकम् ॥
शुक्लमाल्याम्बरधरं शुक्लयज्ञोपवीतिनम् ।
पीयूषसारवर्षिण्या कारुण्यार्द्रदयादृशा ॥
आध्यात्मिकादिदुःखार्तं कारुण्यादखिलं जगत् ।
आह्लादयन्तं भक्तानामभीष्टार्थसुरद्रुमम् ॥
मदनेन्दुबिम्बविगळत्स्मितज्योत्स्नाङ्कुरोत्करैः ।
शिष्याघोघमयध्वान्तं विधुवन्तं मुहुर्मुहुः ॥
अवतीर्णं मुनेर्वंशे भरद्वाजस्य धीमतः ।

नाम्ना दामोदर इति प्रसिद्धं तपसांनिधिम् ।
नीलकण्ठात्मजं साक्षान्नीलकण्ठमिवापरम् ॥
कुण्डालयस्थश्रीकण्ठपादाब्जैकपरायणम् ।
उपगम्य गुरुं शिष्यः कृतपादाभिवन्दनः ॥
मुक्तिस्थलग्रामलसद्गेहे राजकुलाभिधे ।
जातो महिषमर्दिन्याः समीपे विलसत्कुले ॥
वसिष्ठवंशजो नाम्ना शङ्करेति प्रियो गुरोः ।
इदमाह वचो धीमान् विनयावनतो वशी ॥
साङ्गो वेदस्त्वया प्रोक्तः शास्त्राणि विविधानि च ।
बहुमार्गविभिन्नानि कथागमशतानि च ॥
अधुना श्रोतुमिच्छामि मन्त्रान् गुह्यतमानपि ॥
स्वैर्विधानैः... सहितान् प्रयोगैश्च पृथग्विधैः ।
वैदिकांस्तान्त्रिकांश्चैव ब्रूहि मे ब्रह्मवित्तम ॥

End :

अनुलोमविलोमानामक्किवाचान्तथापरं ।
स्थितैर्वर्गैः क्रमादङ्गं कुद्धोल्कादिभिरेव वा ॥
श्यामादिभिस्तथा षड्भिर्देहादिभिरमन्मृतम् ।
'... क्रुद्धमहावीरद्युस्सहस्रसहिताः क्रमात् ।
एते उल्कचतुर्थिहुतवहजायान्तास्तत्त्वदर्शिभिः ॥
प्रोक्ताः श्री देवी पद्मिनी विष्णुपत्नी च ।
वरदाद्य यावन्मरुपशूलिनीय देव्या... ... (?) ॥

Colophon :

Author : Śaṅkara of Muktisthala as derives from his teacher Dāmodara.

Remarks—The work is composed in the form of

instructions received from Dāmodara by his disciple, Śaṅkara. The introductory portion discloses the nativity etc. of Damodara and Śaṅkara.

—+—

॥ मन्त्रानुष्ठानक्रमादि ॥

1061. MANTRĀNUṢṬHĀNAKRAMĀDI.

Substance—Palm leaf. Size—15″ × 2″. Leaves—138. 7—9 lines per page and 44—54 letters per line. Script—Malayāḷam. No. of Granthas —3000.

Subject—Rites preliminary to the recital of *mantrās.*

Beginning:

गणपतये नमः । अविघ्नमस्तु ।

पद्मस्वस्तिकादीनामन्यतममासनमास्थाय प्राग्वदनो भू ... ... गुरुमभिवन्द्याभीष्टदेवतां प्रणम्या ... ... मन्त्रेणोभयाङ्गुष्ठादुभयकनिष्ठान्तं व्यापकन्यासं कृत्वा हस्ताभ्यन्तरबाह्यतलयोर्व्यापकन्यासानन्तरमुभयोर्गोळकाकारेण न्यासं कृत्वा देहेऽपि तेनैवोभाभ्यां हस्ताभ्यां शिरआदिपादतलान्तं व्यापकन्यासं कृत्वा तेनैव तालत्रितयं कृत्वा पूर्वाद्यूर्ध्वपर्यन्तं दश दिशो बन्धयेत् ।

End:

ऊर्ध्वदन्तयुतः शार्ङ्गी चक्री दक्षिणकर्णयुक् ।
मांसन्नाथाय नत्यन्तो मूलमन्त्रोऽष्टवर्णकः ॥

ऋषिर्ब्रह्मास्य गायत्री छन्दः कृष्णस्तु देवता ।
वर्णयुग्मैः समस्तेन प्रोक्तं स्यादङ्गपञ्चकम् ॥
पञ्चवर्षमतिलोलमङ्कणे सावधानमतिचञ्चलेक्षणम् ।
किङ्किणीवलयहारनूपुरैराञ्चितं नमत नन्दनन्दनम् ॥
ध्यात्वैवं प्रजपेदष्टलक्षं ... ... ॥

Colophon :

Author :

Remarks—The Ms. aims at showing the modes of invocation. A lacuna is marked just before the beginning of the portion dealing with the worship of Gopālakṛṣṇa.

॥ यन्त्रसारः (सव्याख्यः) ॥

1062 A. YANTRASĀRA
with commentary.

Substance—Palm leaf. Size—7½″ × 1¾″. Leaves—44. 11 lines per page and 28 letters per line. Script—Malayāḷam. No. of Granthas—850.

Subject—The methods of drawing mystic diagrams.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।
गवादिसकलसमृद्धिप्रदं गोपालकयन्त्रमाह—
गर्भगसाध्यं मध्ये मारं कोणेषु षट्सु षड्वर्णम् ।
चतुरणलसितकेसरजलनिधिपत्रोदरे क्रमेण लिखेत् ॥
द्वादशवर्णस्य मनोस्त्रीणि त्रीण्यक्षराणि तद्बाह्ये ।

दशदलकेसरविलसद्दशार्णमन्त्राक्षरस्य चैकैकम् ॥
विंशतिवर्णस्य मनोर्द्वौ द्वौ वर्णौ विलिख्य दलमध्ये ।
षोडशसंख्येषु बहिः केसरविलसत्स्वरेषु दलमध्ये ॥
आगावस्यान्तर्विलिख्य मूक्तस्यार्धमर्धमृचाम् ।
हृद्भिः संवेष्ट्य बहिर्धरणिपुराम्नोघसद्वरबीज ॥ (?)
हृमिति वराहबीजं दिक्षु लिखेच्छोभने मुहूर्तवरे ।
गोपालयन्त्रमेतद् विधिना संस्थापितं गृहे यस्मिन् ॥

End :

अपामग्ने महाविष्णुं यजामहे शिरः । तेजसा दीप्यमानो ज्वलन्तं सर्वतोमुखं सुगन्धिं पुष्टिवर्धनं शिखा । स नो मृत्योस्त्रायतां नृसिंहं भीषणम् उर्वारुकमिव बन्धनात् कवचम् । नमो ब्रह्मणे मृत्युमृत्युं मृत्योर्मुक्षीय नेत्रम् । विश्वनाभिर्नमाम्यहं मामृतात् अस्त्रं ।

हेमाम्भोजे निषण्णं स्रवदमृतघटौ चक्रशङ्खौ गदाब्जे
अक्षस्रक्कुण्डिकाख्ये शशिशकलधरं धारयन्तं सुभूषम् ।
हेमाभं पीतवस्त्रं रविशशिदहनं त्रीक्षणं चित्स्वरूपं
सर्वज्ञं सर्वगं तं हरिहरविधिजं विश्वरूपं नमामि ॥
वैदेहीसहितं सुरद्रुमतले हैमे महामण्डपे
मध्येपुष्पकमासने मणिमये वीरासने संस्थितम् ।
अग्रे वाचयति प्रभञ्जनसुते तत्त्वं मुनिभ्यः परं
व्याख्यान्तं भरतादिभिः परिवृतं रामं भजे श्यामलम् ॥

Colophon :

Author :

Remarks—50 *yantras* beginning from *Gopālaka-yantra* are set forth in this codex. Again

Bhuvaneśvarī mantras are quoted herein with the metre and the verses of meditation thereon. The last leaf contains the metres, Ṛṣi etc. of certain hymns. This work is different from Mss. Nos. 8046 and 8047, DCSM. Vol. XV, bearing the same title.

॥ मूर्त्तित्रयकल्पः ॥

1062 B. MŪRTITRAYAKALPA.

Substance—Palm leaf. Size—$7\frac{1}{3}'' \times 1\frac{3}{4}''$. Leaves—9. 12 lines per page and 24 letters per line. Script—Malayāḷam. No of Granthas—160.

Subject—*Mantras* pertaining to Brahmā, Viṣṇu and Śiva.

Beginning :

हरिः श्रीगणपतये नमः । अविघ्नमस्तु ।

श्रीमन्त्रिपदराजीवमकरन्दरजांस्यसौ ।

नत्वा जगद्गुरोर्धीमानपृच्छद्भिषणात्मजः ॥

भगवन्दुर्लभं श्रेयः सकलं साध्यते जनैः ।

द्राघीयसैव नियतं संपन्नेन यदायुषा ॥

तस्मात्संप्राप्तये तस्य यतमानेन सेव्यते ।

का मूर्त्तिः केन मन्त्रेण विधिना कीदृशेन वा ॥

एतच्छुश्रूषवे सर्वं मह्यं वद दयानिधे ।

प्रसीद भार्गवश्रेष्ठ यद्यहं श्रवणोचितः ॥

इति श्रुत्वा च काव्यस्य शिष्यस्य वचनं मुनिः ।

शुक्रः प्रीतमनाः प्रोचे किञ्चिन्प्रणिधिमा(?)स्थितः ॥

साधु साधु महाभाग कुरुष्व प्रश्नमीदृशम् ।
उपपन्नमिदं सर्वं वाचस्पतिसुतस्य ते ॥
आयुषः साधका नैकाः परमेश्वरतत्पराः ।
आगमे प्रतिपाद्यन्ते मन्त्रास्तन्त्रसमन्विताः ॥

End :

कोणेष्वष्टसु भूपुरद्वयगतेष्वर्णांश्च तुर्ये पदे
गायत्र्या बहिरत्र दिक्षु च हं रं बीजं माणिश्चान्यतः
कोणस्थेऽपि च शूलयुग्मनिवहे बीजेऽग्निवायू लिखेद्
विद्याद्यन्त्रवरं महाफलमसुं ह्यानुष्टुभं नामतः ॥
एकाक्षरप्रदातारं योऽवमन्येत हीनधीः ।
रौरवं नरकं प्राप्य चण्डालेषूपजायते ॥
अग्रे च मूले प्रपदे त्रिसन्धौ वामे पदेष्वेव पदेषु याम्ये ।
.... आधारपत्रादि चतुर्दलेषु ..... ॥

Colophon :

इति त्रिमूर्त्तिकल्पः समाप्तः ।

Author :

Remarks—The Ms. defines the methods of meditating upon the deities Brahmā, Viṣṇu and Śiva.

॥ राममन्त्रकल्पः ॥

1063. RĀMAMANTRAKALPA.

Substance—Palm leaf. Size—9½" × 1½". Leaves—20. 7 lines per page and 34—42 letters per line. Script—Malayāḷam. No. of Granthas—332.

Subject—*Mantras* relating to Rāma.

Beginning etc.—Same as No. 1048 B.

Remarks—The Ms. opens with the *Mantrakalpas* such as *Viṣṇusudarśana*, *Santānagopāla* etc. The leaves are much decayed. Just after the *Rāmamantra* occurs the *Brahmayajña*.

॥ रुद्रादिमन्त्रक्रमः ॥

1064 A. RUDRĀDIMANTRAKRAMA.

Substance—Palm leaf. Size—11″ × 1¼″. Leaves—38. 8 lines per page and 28 letters per line. Script—Malayāḷam. No. of Granthas—520.

Subject—*Mantras* appertaining to Śiva.

Beginning:

गणपतये नमः । हृल्लेखाद्य एकपञ्चाशदक्षरोऽघोरास्त्रमन्त्रः । तद्यथा प्रपञ्चसारे—

जीवाशिखिकर्णेरफान् प्रतिपीप्स्य? प्रादिकांश्च पुनरपि ताम् ।
एधत्यायिनियान्तांस्तानेव करान्वितान् तनुरूपान् (?) ।
आभाप्य चटप्रचटौ सकहवर्मौ बन्धघातयो वीप्स्य ।
प्रोच्चावम्मान्त्रावधि समुद्धरेच्छक्तिपूर्वकं मन्त्रम्(?) ॥

End:

गुह्यातिगुह्यगोप्त्रि त्वं गृहाणास्मत्कृतं जपम् ।
सिद्धिर्भवति मे येन त्वत्प्रसादाद्वृदिस्थिते ॥

इति सामान्यप्यजलेन (?) देव्या वामहस्ते जलं समर्प्य पुनरप्यभीष्टं संप्रार्थ्य परिवार्यदेवतागणं देव्यङ्गे विलीनं विभाव्य देवीमप्यात्मनि मूलेनोद्वास्य सुखी भूयात् ।

Colophon :

Author :

Remarks—The two other works contained in the codex are separately catalogued as Nos. 1064 B. & C.

॥ निग्रहस्तम्भनोपायः ॥

1064 B. NIGRAHASTAMBHANOPĀYA.

Substance—Palm leaf. Size—11″ × 1½″. Leaves—8. 7 lines per page and 24—30 letters per line. Script—Malayāḷam. No. of Granthas—80.

Subject—*Mantras* causing injury to enemies.

Beginning :

श्रीमेरुशिखरारूढं योगिनीचक्रमध्यगम् ।
सर्वज्ञं भैरवेशानं पार्वती प(तिमि?रिपृ)च्छति ॥

देव्युवाच—
देव देव महादेव त्रैलोक्यहितकाम्यया ।
अकुळेश कुळेशान सर्वज्ञानवरप्रद ॥
साधकानां हितार्थाय किञ्चिद्विज्ञाप्यते मया ।
वक्तुमर्हसि देवेश प्रसादमपि शाश्वतम् ॥

विज्ञानं साधकेन्द्राणां स्तम्भनिग्रहकारकम् ।
श्रोतुमिच्छामि देवेश वक्तुमर्हसि भैरव ॥

End :

तस्य रोगाश्च वैराश्च सम्भवन्ति न जातुचित् ।
इदं जपन्नोळेशनि(?)राज्ञां स्त्रीणामपि प्रिये ॥

मोहनं साधकेन्द्रेण भविष्यति न संशयः ।
वने शैले नदीमध्ये यो जपेन्मन्त्रराजकम् ॥

तस्य विघ्नभयं नास्ति त्वां शपे सुरसुन्दरि ॥
मोहनं स्तम्भनं कुर्यान्महिषासुरवाहनात् (?) ।
श्यामरक्तसमप्रख्यां शत्रूणां परमेश्वरि ॥

एषा विद्या वरारोहा दशोत्तरशताक्षरा ।
षडङ्गपरिपूर्णाय रक्षते साधकेश्वराः ॥

... ...

Colophon :

इति निग्रहाष्टकमिदं श्रीवरं स्यात् । पञ्च होमः समः विटविदूषकनर्तकगायकभ्रमरभामरशृङ्गकुलाप्रकटित इति रहस्याशिवा...र्थनं जपतु निग्रहयोगमिमं स्तवम् । हरिः ।

Author :

Remarks—The Ms. embodies the *mantras* employed for the hypnotisation and annihilation of enemies.

॥ गर्भोत्पादनादिसाधकाः भाषामिश्राः ॥

1064 C. GARBHOTPĀDANĀDISĀDHAKA.

Substance—Palm leaf. Size—11″ × 1½″. Leaves—10. 7 lines per page and 26 letters per line. Script—Malayāḷam. No. of Granthas—112.

Subject—*Mantra* conducive to conception.

Beginning:

ഇനി ഗർഭമൊണ്ടാവാനും ചാപിള്ള പിറപ്പാനും മന്ത്രം ററം സം ബ്രം മം ശം ബ്രം വം ശം ശം കം ആം ശ്രം ശകവാനില്ലെൻറ ഇമ്മന്ത്രങ്ങളും ഷോഡശകലയുമിട്ട് നടുനാലറയിലും ഭൂവം നശിയിട്ട് കലശസ്ഥാപനം നാല്പാമരംകൊണ്ട് കഷായംവെച്ച് കലശം പൂജിച്ച് പ്രാണപ്രതിഷ്ഠയുഞ്ചെയ്ത് സ്ഥാപിച്ച് പൂർവപക്ഷത്തു പഞ്ചമിനാൾ ജലഗന്ധപുഷ്പധൂപദീപംകൊടുത്തു കലശമാടി യന്ത്രം കെട്ടുവിത്.

End:

बाला मन्त्री कटाक्षी मम हृदयसुखी मत्तभावप्रचण्डी
व्याळायज्ञोपवीती विकटचरचरी वीरशक्तिप्रसादी ।
बाले बालेन्दुमौली मदगजभुजगास्ताभिषेकी सुतन्द्री
काळी कङ्काळरूपी कखगजप्रकृतींकारिणीक्लीं नमस्ते ॥
मूलाधारी महात्मी? हुतवहसहिते मूलमन्त्रत्रिनेत्री
हारा केयूरवल्ली अखिलत्रयवसी अम्बिकायै शिवायै ।
वेदी वेदान्तनाभी विधिमखसुखी साशसन्त्री ससारी(?)
... ... सुन्दरी सौं नमस्ते ॥

Colophon:

Author:

Remarks—The work deals with the *mantras* and *yantras* favourable to conception and avoidance of still-birth.

॥ सारस्वतस्तोत्रम् ॥

1064 D. SĀRASVATASTOTRAM.

Substance—Palm leaf. Size—11″ × 1½″. Leaves—7. 7 lines per page and 28 letters per line. Script—Malayāḷam. No. of Granthas—80.

Subject—Apanegyric of Viṣṇu.

Beginning:

गणपतये नमः । राक्षस उवाच
मया निसर्गतो ब्रह्मन् जातिदोषाद्विशेषतः ।
निर्विवेकेन चित्तेन पापं कर्म सदा कृतम् ॥
अपुण्यान्मम पापेषु न पुण्येषु रतं मनः ।
तत्पापमक्षयान्मोक्षं प्राप्नुयां येन तद्वद ॥
यानि पापानि कर्माणि बालत्वाच्चरितानि मे ।
दृष्टां योनिमिमां प्राप्य तन्मुक्तिं कथय द्विज ॥

End:

आराध्य स जगन्नाथं स तत्र पुरुषोत्तमम् ।
सर्वपापविनिर्मुक्तो विष्णुलोकमवाप्तवान् ॥
एवं त्वमपि राजर्षे सर्वपापोपशान्तये ।
आराधय हृषीकेशं जपन् सारस्वतं स्तवम् ॥

य एतत्परमं स्तोत्रं वासुदेवस्य मानवः ।
पठिष्यति स सर्वेभ्यः पापेभ्यो मोक्षमाप्स्यति ॥

वासुदेवाय नमः ।

Colophon :

Author :

Remarks—The Ms. contains the expiatory *mantras* imparted to Rākṣasa by Sarasvatī.

॥ विष्णुपञ्जरम् ॥

1064 E. VIṢṆUPAÑJARAM.

Substance—Palm leaf. Size—11″ × 1½″. Leaves—2. 7 lines per page and 24—28 letters per line. Script—Malayāḷam. No. of Granthas—22.

Subject—Same as No. 1064 D.

Beginning :

गणपतये नमः । शतानीक उवाच
भगवन् कीदृशीं रक्षां स चकार द्विजोत्तमः ।
यया निर्द्धूतवीर्योऽसौ निरस्तो रजनीचरः ॥

शौनक उवाच—
एकाग्रचित्तो गोविन्दे तं जपंस्तत्परायणः ।
सर्वदुष्टोपशमनं प्रविष्टो विष्णुपञ्जरम् ॥

शतानीक उवाच—
विष्णुपञ्जरमिच्छामि श्रोतुं धर्मभृतामपि ।
सदा सर्वभयेभ्यस्तु रक्षा या परमा भवेत् ॥

End :

यथा परं ब्रह्म हरिस्तथा परं
जगत्स्वरूपश्च स एव केशवः ।
ऋतेन तेनाच्युतनामकीर्तनात्
प्रणाशमेति त्रिविधं ममाशुभम् ॥

Colophon :

Author :-

Remarks—The Ms. is fairly accurate.

॥ विज्ञानचन्द्रिका (प्रपञ्चसारव्याख्या) ॥

1065. VIJÑĀNACANDRIKĀ.
Commentary on Prapañcasāra.

Substance—Palm leaf. Size—19" × 2". Leaves—115. 9—10 lines per page and 44 letters per line. Script—Malayāḷam. No. of Granthas—4350.

Subject—Same as No. 1051 E.

Beginning :

अविघ्नमस्तु । सर्वस्य लोकस्य शाश्वतमुपकारं चिकीर्षुराचार्यः प्राणिनामज्ञान... ... ...
Substance—Palm leaf. Size—18" × 2". Leaves—152. 9 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—4100. Incomplete.

Subject—Same as No. 1092.

Beginning :

गणपतये नमः । अविघ्नमस्तु ।

महिषीभृताधिप... ... ...
...ष्टां विवक्षुराचार्यो दुर्गानमस्कारपूर्वक... ...प्रतिष्ठाप्र-
तिपादनं प्रतिजानीते शिरसा... ... ...
... ...तदुपादानभूतायाश्च तस्याः प्रतिष्ठां वक्ष्ये ।
कीदृशीं दुर्गतिहारिणीं अ... ... ...
... ...णमेतद् दुर्गाया विशेषणम् । पुनः
प्रतिष्ठां विशिनष्टि— धर्मेति । दुर्गाप्रतिष्ठा... ... ...
... ...

End :

... ...निवेद्यं समर्प्याचमनमन्त्यचुलुकोदकं दत्त्वा
तोयं गण्डूषजलं दत्त्वा पुनः पानीयं मधुप... ...भ...
... ...वासयेत् । विसर्जनस्य विषयमाह— मण्डलेति ।
मण्डले पञ्च... ... ...नं कार्यं

विसर्जनस्थाविषय... ... ...
... ...

Colophon :

१ इति क्रियासारव्याख्यायां दौर्गभागे प्रथमः पटलः ।

२ ... ...शास्तृभागे
द्वितीयः पटलः ।

Author :

Remarks—The leaves are too frangible to be touched. The work commences on *Daurga-bhāga* and ends on a fragment of the third *patala* on *Śāstrbhāga*.

॥ तत्त्वप्रदीपिका (विष्णुसंहिताव्याख्या) ॥

1096 A. TATTVAPRADĪPIKĀ.

Commentary on Viṣṇusamhitā.

Substance—Palm leaf. Size—19″ × 1¾″. Leaves—60. 8 lines per page and 60 letters per line. Script—Malayāḷam. No. of Granthas—1800. Complete.

Subject—Same as No. 1090.

Beginning :

हरिः । श्रीगणपतये नमः ।

हृदये जृम्भतां नित्यं मम हस्तिमुखं महः ।
अभिप्रेतार्थसिद्ध्यर्थं देवैरपि यदर्चितम् ॥

या भारतीति विख्याता लोके सा प्रददातु मे ।
अज्ञानतिमिरान्धस्य ज्ञानदीपं शुभानना ॥
भासतां नो हृदम्भोजे किङ्किणीजालमण्डितम् ।
कलायसुमनःश्यामं तेजो भुवनभासकम् ॥
उद्धृत्य पञ्चरात्रेभ्यः सारं येनेदमीरितम् ।
भुक्तिमुक्तिप्रदं तन्त्रं तस्मै सुमतये नमः ॥
गुरून् प्रणम्य सर्वज्ञांस्तत्प्रसादान्निरूप्यते ।
तन्त्रस्यास्य मया व्याख्या नाम्ना तत्त्वप्रदीपिका ॥

औपमन्यवः सिद्धं प्रणम्य पृष्टवान् । उपमन्योः पुत्रः औपमन्यवः ।

End :

तत्र गृह एवास्थाप... ... ...
... ...अचञ्चला श्रीर्वर्ध...।
साक्षाद् भगवता प्रोक्ता सर्वाज्ञानविनाशिनी ।
या (विष्णु)संहिता पुण्या धर्मकामार्थमोक्षदा ॥
गुरा... ... ...
... ...नाम्ना तत्त्वप्रदीपिका ॥
मेयं विमत्सरैः शान्तैर्विष्णु.. ...दृढव्रतैः ।
शोधनीया प्रयत्नेन समुद्दीक्ष्य महात्मभिः ॥
भगवन्न... ... ...
... ...स्थिराम् ॥

Colophon :

इति विष्णुसंहिताव्याख्यायां तत्त्वप्रदीपिकायां त्रिंशः पटलः ।

Author :

Remarks—Many leaves in the middle of the Ms. are missing. A few portions of Hāriṇī, another commentary on Viṣṇusamhitā, are alluded to herein. The leaves are completely worn out.

॥ हारिणी (विष्णुसंहिताव्याख्या) ॥

1096 B. HĀRIṆĪ.

Commentary on Viṣṇusamhitā.

Substance—Palm leaf. Size—19½" × 1¾". Leaves—65. 8 lines per page and 70 letters per line. Script—Malayāḷam. No. of Granthas—1125. Incomplete.

Subject—Same as No. 1090.

Beginning :

... ...स्या विष्णूक्तत्वलक्षणं प्रामाण्यमाह मेति । मेयं मेव विष्णुसंहितेयं नान्या । तत् कोऽप्यसमाश्वासो मा भूदित्यर्थः । गुह्यतमा सा गुह्या इयं गुह्यतमा इति व्यतिरेको ध्वन्यते ।

End :

यथोक्तं 'हृत्कण्ठास्यगताः पुनन्ति विधिनैवापो द्विजादीन् क्रमादि'ति ब्रह्मतीर्थोक्त्यैव दक्षिणहस्तेनाचाम इति च गम्यते । दक्षिणे ब्राह्मणहस्ते पञ्च तीर्थानि भवन्ति । प्राङ्मुखश्चेत पुरस्ताद्दैवं, दक्षिणतः पित्र्यं, पश्चाद् ब्राह्ममुत्तरं प्राजापत्यं मध्ये पारमेष्ठ्यमिति कार्त्स्न्यायनकल्पे दक्षिण

Colophon :

इति हारिण्याख्यायां पञ्चमः पटलः ।

Author—Nārāyaṇa.

Remarks—Several leaves are missing.

॥ तन्त्रपद्धतिः ॥

1097. TANTRAPADDHATI.

Substance—Palm leaf. Size—17″ × 2″. Leaves—167. 9—11 lines per page and 56 letters per line. Script—Malayāḷam. No. of Granthas—5800.

Subject—Same as No. 1090.

Author—Īśānaśivagurudevamiśra.

Remarks—The Ms. is printed in four parts, as Nos. 69, 72, 77 and 83 in TSS. and has been used for their publication. The codex begins with the 14th *paṭala* on *Sāmānyapāda* and ends with the 51st on the *Mantrapāda* in *Pūrvārdha*. The opening page is numbered 65. The leaves are much damaged. The work is also known as *Īśānaśivagurudevapaddhati* after the author's name.

॥ तन्त्रपद्धतिः ॥

1098. TANTRAPADDHATI.

Substance—Palm leaf. Size—16½″ × 2″. Leaves—

12. 6—7 lines per page and 56 letters per line. Script—Malayāḷam. No. of Granthas—275.

Subject—Same as No. 1090.

Author—Same as No. 1097.

Remarks—Only *Yogapāda* is embodied in this Ms. The leaves are much damaged.

॥ तन्त्रपद्धतिः ॥

1099. TANTRAPADDHATI.

Substance—Palm leaf. Size—7″ × 2″. Leaves—26. 7 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas—275.

Subject—Same as No. 1090.

Author—Remarks—Same as No. 1098.

॥ तन्त्ररहस्यसारः ॥

1100. TANTRARAHASYASĀRA.

Substance—Palm leaf. Size—8″ × 1½″. Leaves—31. 10 lines per page and 26 letters per line. Script—Malayāḷam. No. of Granthas—500. Incomplete.

Subject—An account of the consecratory rites.

Beginning :

श्रीगणपतये नमः । अविघ्नमस्तु ।

श्रीषण्मुखाय नमः ।

श्रीमन्षड्गुणसम्भृतं वपुरधिष्ठायानुगृह्णाति यः
श्रद्धाभक्तिपवित्रितोपकरणैः स्वारम्भभूतात्मकैः ।
पूर्णानन्दरसानुभूरपि सदा सन्तर्पितो यज्वना
तं देवं निगमागमाद्यधिगतं नित्यं समाराधयेत् ॥

यियक्षुणाचार्यवरो वृतोऽथ
सम्मृतिपः कर्म समातनोतु ।
प्रतिश्रुतं भूमिपरिग्रहादि
तीर्थाभिषेकावधिकं क्रमेण ॥

तीर्थान्ते तटिनीतटे जलनिधेस्तीरे सरित्सङ्गमे
शैलाग्रेऽद्रितटे वनोपवनयोरुद्यानदेशे तथा ।
सिद्धाद्यायतनेषु वा गुरुवरो ग्रामे पुरे पत्तने
वान्यत्रापि मनोरमे सुरसमिज्यायै क्षितिं कल्पयेत् ॥

End :

उत्पाद्योक्तवदल्पबिम्बमुपनीयातो बहिःसन्दहेद्
गोसर्पिःस्नपितं तदर्हदहने तद्दारवं चेद् गुरुः ।
लोहं चेद् गुरवे समर्पयतु तद् विद्राव्य यज्वाथवा
छित्वा नालमिदं विशोध्य सुशुभं तत् कौतुकं कल्पयेत् ॥

मेयं कृतिस्तन्त्ररहस्यदुग्धा
रक्ष्या मुहुर्मूर्खमुखप्रपातात् ।
आचार्यवर्यैरियमेव शश्व-
द्विश्वेश्वरेज्यासदनुष्ठितास्तु ॥

Colophon :

श्रीगुरवे नमः । श्रीवेदव्यासाय नमः ।

अविघ्नमस्तु । शुभमस्तु ।

Author :

Remarks—The Ms. is an orderly collection of verses contained in the *Tantrasamuccaya.*

॥ तन्त्रसमुच्चयः ॥

1101. TANTRASAMUCCAYA.

Substance—Palm leaf. Size—14″ × 2″. Leaves—87. 12 lines per page and 56 letters per line. Script—Malayāḷam. No. of Granthas—3650.

Subject—The rites of worshipping deities.

Author—Nārāyaṇa, son of Ravi.

Remarks—The work is printed with commentary in TSS. in two parts as Nos. 67 and 71.

॥ तन्त्रसमुच्चयः ॥

1102. TANTRASAMUCCAYA.

Substance—Palm leaf. Size—23″ × 1¾″. Leaves—49. 8 lines per page and 72 letters per line. Script—Malayāḷam. No. of Granthas—1750.

Subject etc.—Same as No. 1101.

Remarks—The work begins from the 6th *śloka* of the 4th *paṭala* and extends up to a portion of the 8th.

[तन्त्रसमुच्चयव्याख्या] ॥ तन्त्रसमुच्चयसंग्रहः ॥

1103. TANTRASAMUCCAYASAṄGRAHA.

Substance—Palm leaf. Size—14″ × 1½″. Leaves—39 7—8 lines per page and 52 letters per line. Script—Malayāḷam. No. of Granthas—100.

Subject—Same as No. 1101.

Beginning :

आवश्यकी यद्यपि नित्यपूजा
तदर्थसम्पादितमन्त्रबिम्बे ।
तथापि दोषोपहतौ यथार्हं
कृत्वैव तन्निष्कृतमर्चयेत ॥
क्षेत्रे मृतिर्जननमङ्गणमण्डपादौ
मूत्रामृगादिपतनं पतितादिवेशः ।
सोलूकगृध्रकरटश्व(ख)रोष्ट्रकोल-
क्रोष्ट्रक्षदुण्डुभपुरःसरगर्भवेशः ।
बिम्बस्य पातचलनादिरथ प्रदाह-
स्वेदप्ररोदहसितानि तथाद्भुतानि ।
छत्राकनाकुमुधुकादिसमुद्गमाश्च
पूजाविलुप्तिरपि चास(ति दि)ष्टदोषे ॥

End:

हृतविषये मनुरेवं परेष्टपरमेश्वरादिपदमत्र ।
पुरुषोत्तमपदविषये कुर्यात् स्वस्थोचितं मन्त्री ॥

उद्वास्य तीर्थं निजवाहने त-
मारोप्य मूलालयमागमय्य ।
तस्मिन्नहन्येव नियोज्य मू-
र्ध्विम्बेऽभिषिच्य प्रयजेच्च देवम् ॥

तस्मिन् परस्मिन्नथवाह्नि देवं
समुक्तरीत्या कलशैः प्रभूतैः ।
संस्नाप्य यात्रोदितदोषशान्त्यै
समर्चयेद् भूतबलिं किरेच्च ॥

Colophon :

इति तन्त्रसमुच्चये चतुर्थः पटलः ।

Author :

Remarks — The Ms. comprises only the section apportioned for daily religious observances. The work is a commentary on Tantrasamuccaya notwithstanding the colophon "तन्त्रसमुच्चये" at the end of each chapter. *Patalas* 2—4 are alone embodied herein. The 2nd verse at the outset and the last on the 4th *patala* form the opening verse in the 10th *patala* and the closing verse of the 9th respectively in the original.

॥ त्रिपुरारहस्यम् ॥

1104. TRIPURĀRAHASYAM.

Substance—Palm leaf. Size—18″ × 1¼″. Leaves—155. 10 lines per page and 64 letters per line. Script—Malayāḷam. No. of Granthas—6200. Incomplete.

Subject—The greatness of Devī (Tripurā).

Beginning :

श्रीगणेशाय नमः । श्रीमत्सद्गुरुचरणारविन्दाभ्यां नमः ।
श्रीमहासरस्वत्यै नमः ।

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥

नमः कार ... हृद्बीजाकाशगात्रिणे ।
यच्छीलालेशलसिता लोकालोकाण्डरेणवः ॥

यदक्षरं परं ब्रह्म जगन्मालामणिप्रभम् ।
सर्व.... ....त्मकं सर्वसारम् ॥

द्वयाक्षरमसंसारदलबीजशिवात्मकम् ।
शिवरूपं शक्तिरूपं ब्रह्मरूपमरूपकम् ॥

त्रिपुरां परमेशानीं महाप्रलयसाक्षिणीम् ।
दग्धकामोज्जीवनाय सुधासारां नमाम्यहम् ॥

अस्ति दक्षिणदिग्भागे मलयाद्रिर्महोच्छ्रयः ।
शृङ्गसंघातसंक्रान्तसप्तसप्तिमहापथः ॥

End :

मया बुद्धेः संगमस्तु समाधिरभिधीयते ।
मन्मात्रलोकसंप्राप्तिर्मोक्षः प्रिय उदाहृतः ॥
एवं प्रोक्तः स्ववृत्तान्तः त्वमप्येवंविधो ननु ।
तद्युक्तैतत् सुविज्ञाय परं श्रेयः समाप्नुहि ॥

Colophon :

इति श्रीज्ञानखण्डे हेमचूडोपाख्याने संहारव्यायिका-विवरणे अष्टमोऽध्यायः ।

श्रुत्वेत्थं प्रियया प्रोक्तं हेमचूडोऽतिविस्मितः ।
हर्षगद्गदया वाचा पुनर्वक्तुं प्रचक्रमे ॥

Author :

Remarks—The Ms. comprises 59 chapters on *Māhātmyakhanda* and 8 on *Jñānakhanda*. It may be classed under the category of *purāna*. The first 71 leaves, the next 64 and those beginning with the letter-numeral क and ending with न are separately numbered. The following verse :

"...ये शक्रे सहसा ज्वलिता दिशः ।
तस्मिन्निन्द्रे स्थिते चोद्ग् जहसे तातिकोपने(?) ॥"

... ...

is interpolated in the 2nd line of the front leaf.

॥ नागबलिकल्पः ॥

1105 A. NĀGABALIKALPA.

Substance—Palm leaf. Size—14″ × 1½″. Leaves—7. 7 lines per page and 36 letters per line. Script—Malayāḷam. No. of Granthas—140.

Subject—An account of the rites for propitiating serpents.

Beginning:

हरिः । श्रीगणपतये नमः ।

सर्वमन्त्रमयं नित्यं रोगामृतरसाप्लुतम् ।
मद्गुरोः श्रीपदाम्भोजं वन्दे मम हृदिस्थितम् ॥

हृत्पद्मसंस्थितं देवं त्रिनेत्रं चन्द्रशेखरम् ।
वरदाभीतिटङ्कैणधरं वन्दे शिवं विभुम् ॥

एवं गुरुशिवौ सौम्य नमस्कृत्य पुनः पुनः ।
बलिदानं तु नागानां संक्षेपाद्वक्ष्यतेऽधुना ॥

End:

भूयश्च स्वगृहं प्राप्य ब्राह्मणांश्चापि भोजयेत् ।
पुनर्दद्याच्च गुरवे गोस्वर्णांशुकभूषणम् ॥

एवं यः कुरुते मर्त्यो नागानां बलिमुत्तमम् ॥
सर्वरोगविनिर्मुक्तो विशेषाद्विषरोगतः ।
सर्वान् कामानवाप्नोति दीर्घमायुर्नरेश्वरः ॥

Colophon:

इति नागबलिकल्प्यां चतुर्थः ।

Author :

Remarks—The concluding portion of the work indicates that it is employed for poison-cure and the treatment of other ailments.

॥ रक्तचामुण्डीकल्पः ॥

1105 B. RAKTACĀMUṆḌĪKALPA.

Substance—Palm leaf. Size—14″ × 1½″. Leaves—3. 7 lines per page and 32 letters per line. Script —Malayāḷam. No. of Granthas—42. Complete.

Subject—Rites in relation to the worship of Rakta-cāmuṇḍī.

Beginning :

प्रयोगं रक्तचामुण्ड्याः कल्पं वक्ष्यामि साम्प्रतम् ।
मन्त्रेण सकलावाप्त्यै सिद्धशक्तयः करोतु धीः ?
तारं नमोभगवतिपदं पश्चात् समुद्धरेत् ।
रक्तेति च पदं पश्चाच्चामुण्डेश्वरिसंयुतम् ।
मधुमांसपदान्ते च भक्षिणीति पदं पुनः ॥

End :

मनुना मन्त्रि.....पुना ।
दानं करोति चेत् स्त्रीणां भवन्ति वशगाः स्त्रियः ।
रसं करे विरच्याथ शङ्खपुष्पीरसैः सह ॥
त्रिसहस्रं जपेन्मन्त्रं पाणिं संगृह्य यत्नतः ।
सा स्त्री स्ववशमायाति.....क्षणात्तविचारणा ॥

Colophon :

इति शङ्कराचार्यविरचिते रक्तचामुण्डीकल्पे वश्यविधिर्नाम चतुर्थः पटलः ।

इति रक्तचामुण्डीकल्पं समाप्तम् ।

Author—Śaṅkarācārya.

Remarks—The Ms. covers four *patalas*. The last Fol. is numbered 5. The third and fourth FF. are missing.

॥ नारदीयपद्धतिः ॥

1106. NĀRADĪYAPADDHATI.

Substance—Palm leaf. Size—21″ × 1½″. Leaves—62. 8 lines per page and 68 letters per line. Script — Malayāḷam. No. of Granthas—2000.

Subject—Details regarding the consecratory rites.

Beginning :

... ...मो भगवते नमः तत् सत् नमः । ॐ ह्रूं ॐ नमो विष्णवे ह्रूं ॐ क्ष्रौं ॐ नमो भगवते नरसिंहाय क्ष्रौं नमः । ॐ ह्रूं नमो भगवते वराहाय ह्रः । नमः ॐ खं परब्रह्मणे नमः । क्रमेण व्यूहमिष्ट्वानेन पुनः पूजयेदप्रतिहतशक्तिर्भवति ।

End :

शयनादुत्थितः पूर्वं वामपादं न्यसेद् भुवि ।
निर्गच्छेद्वामपादेन प्रविशेच्च तथा गृहम् ॥

एवं द्वित्रिगुणैनव मध्यमोत्तमसिद्धयः ।
भवन्ति साध्य ... ... कत्यनुरूपतः ॥

Colophon:
इति नारदीयपद्धतौ नवमः पटलः ।

Author:

Remarks—The script is discernible only from the 9th Fol. onwards as the Ms. is completely damaged.

॥ परात्रिंशिका (अनुत्तरतत्त्वविमर्शिनीसहिता) ॥

1107. PARĀTRIMŚIKĀ
with commentary.

Substance—Palm leaf. Size—$7\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—27. 7—8 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas—300.

Subject—The *Śaiva Tantras* obtaining in Kāśmīr.

Beginning:

श्रीगणपतये नमः । अविघ्नमस्तु ।
यत्र तेजांसि तेजांसि तमांसि च तमांस्यलम् ।
तेजांसि च तमांस्येतद्वन्दे ज्योतिरनुत्तरम् ॥
सदागमप्रवाहेण बहुधा व्याहृतं त्रिकम् ।
श्रीमदुत्पलदेवीयं मतसारं तु वक्ष्यते ॥
सदाभिनवगुप्तं च पुराणं च प्रवृत्तिमत् ।
हृदयं तत्परोल्लासैः स्वयं स्फूर्जत्यनुत्तरम् ॥

स्वात्मदेवतैव प्रबुध्यमानावस्थायाम् आत्मानं परामर्शेनानवरतं पृच्छति । तत उच्यते श्रीदेव्युवाचेति ।

End :

अत्राभिनवगुप्तेन भाषितं तदनुत्तरम् ।
एताद्विवेकनिष्ठास्तु मा भूत भ्रमभाजनम् ॥
सच्छिष्याः प्राप्नुताद्यैव भैरवीभावसंपदः ।
संपूर्णानुत्तरानन्दयोगक्षेमादि जायताम् ॥
त्रिलोकीकबळीकारसमावेशविशारदा ।
यस्यां सदात्मना पूर्णमिच्छाज्ञानक्रियात्मना ॥
विसृज्यते यतश्चेमां वन्देऽनुत्तरसंविदम् ।

Colophon :

समाप्तेयमनुत्तरसंविद्विमर्शिनी श्रीत्रिंशिकालघुवृत्तिः ।
इति श्रीमन्महामहेश्वराचार्याभिनवगुप्त ... ... शिवम् ।

पूर्णव्याकरणावगाहनशुचिः सत्तर्कमूलोन्मिषत्-
प्रज्ञाकल्पलताविवेककुसुमैरभ्यर्च्य हृद्देवतम् ।
पीयूषासवसारसुन्दरमहासाहित्यसौहित्यभाग्
विश्राम्याम्यहमीश्वरालयकथाकान्तासखः साम्प्रतम् ॥

श्रीगुरुभ्यो नमः । इति श्रीपरात्रिंशिकाव्याख्यानम् ।

വിരൂപാക്ഷഭട്ടരുടെ പ്രസാദസിദ്ധി നമുക്ക മാതൃകാവന്നതു.

Author :

Remarks—The work is printed with the commentary of *Abhinavagupta* in Kāśmīr Series. *Laghuvrtti* is also appended at the close of the Ms.

॥ परात्रिंशिका (अनुत्तरतत्त्वविमर्शिनीसहिता) ॥

1108. PARĀTRIMŚIKĀ
with commentary.

Substance—Palm leaf. Size—14″ × 1½″. Leaves—16. 8 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas—300.

Subject etc.—Same as No. 1107.

Remarks—The Ms. is much decayed.

॥ प्रद्योतः (प्रयोगमञ्जरीव्याख्या) ॥

1109. PRADYOTA.
Commentary on Prayogamañjari.

Substance—Palm leaf. Size—11″ × 1½″. Leaves—183. 10 lines per page and 36 letters per line. Script—Malayāḷam. No. of Granthas—4130. Complete.

Subject—Consecratory rites pertaining to Śiva.

Beginning:

गणपतये नमः । अविघ्नमस्तु ।

नमः शिवाय चिन्तान्मदुर्विकासविकासिने ।
प्रकृष्टबोधप्रद्योतत्रयाय च गरीयसे ॥

आर्द्रपादकुलोद्भूतनारायणतनूद्भवः ।
त्रिविक्रमोऽहं मज्जन्यै व्याख्यां कुर्वे यथाश्रुतम् ॥

तिरोहितार्थवाक्यानां पदानां वा यथामति ।

स्वार्थमेवापरिच्छिद्य श्रुतार्थस्य स्मृतेरिमाम् ॥

धर्मादिचतुष्टयसिद्धिकारणचर्याज्ञानक्रियायोगानुष्ठानफलसिद्ध्युपायप्रतिष्ठाकर्मप्रकरणमारिरिप्सुः सर्वेश्वरस्य प्रणामच्छलेन ईश्वरसद्भावं च प्रारिप्सितस्य प्रकरणस्य संबन्धाभिधेयप्रयोजनान्यपि बुद्धेरात्मभुव इत्याद्येनाद्यश्लोकेन सूचयति ।

End :

भक्त्या पदाम्बुजसमर्पितयेति— तपोबलेन भगवतः प्रसादात्त-(तौ?दा)ज्ञया मया कृतेयमित्याह— शिवपुरसद्ग्रामभुवा केरळदेशे चोकराख्यग्रामजातेन काश्यपगोत्रसमस्तेन(?)मठरकुलसंभूतेन कोटुमण्डाख्यगृहश्रेष्ठेन बहुयज्ञयाजिना चंकाख्यतटाकतीरप्रतिष्ठितशास्त्रा रक्षितेन कपालिप्रेषिताहन्तु मां (?)गतायाश्चामुण्डायाः पुनरपि कीदृग्भूतेन भवमधुस्रवन्तीविचित्ररचनादलसमुज्ज्वलेयं सतामवतंसभूमौ शिरसोऽलंकारशेखरितमाला भवत्विति ।

Colophon :

निखिलागमार्थसारप्रयोगमञ्जर्यगाधकमलिन्याः ।
प्रसृतस्त्रिविक्रमाख्याद् व्याख्या प्रद्योत एष बोधाय ॥

हुताशनादित्यमुखेन्दुभारती-
मयूखसंबोधितबोधकैरवैः ।
संस्थापनत्रिपोवचस्तर(?)
प्रयोगमञ्जर्यमलार्थकं सरः ॥

इति प्रद्योते प्रयोगमञ्जरीविचरणे एकविंशः पटलः ।
श्रीगुरवे नमः ।

Author—Trivikrama, son of Nārāyaṇa.

Remarks—The commentary is exhaustive and its style, stilted.

॥ प्रयोगमञ्जरी ॥

1110. PRAYOGAMAÑJARĪ.

Substance—Palm leaf. Size—21½″ × 2″. Leaves—69. 8 lines per page and 56 letters per line. Script—Malayāḷam. No. of Granthas—2000.

Subject—Same as No. 1109.

Beginning:

गणपतये नमः । नमश्शिवाय ।

बुद्धेरात्मभुवोऽप्यभूमिममलं यत् तत्त्वमाहुर्बुधा
भेदो यस्य जगन्मयस्य बहुधाप्यौपाधिकी... ।
... ...मन्त्रात्मभिः श्रेयसे
यो वा देहभृतां हिमाचलसुतानाथाय तस्मै नमः ॥

जनयतु हृदि सौख्यमयं तुहिनकरविभूषणो देवः ।
यस्य जगत्त्रयमखिलं धाम्नः कलया कयापि निर्व्यूढम् ॥

येभ्यः प्रणामविधिभिः सकृदप्युपात्तैः
संसारसागरतरङ्गनिमज्जमानाः ।
ध्वस्तान्धकारमहसो मनुजास्तरन्ति
तेभ्यो नमोऽस्तु नियतं गुरुपादुकेभ्यः ॥

ज्ञानाग्निदग्धदुरितैर्विषयप्रमुक्तै-
र्मूर्ध्ना धृताः सकलयोगिभिरादरेण ।
ये सर्वलोकमहिता मनसः प्रसादं
पुष्णन्तु ते गुरुपदाम्बुजपांसवो वः ॥

उद्दामता न वचसो नच कौशलं मे
बुद्धेः शिवस्य नच बोद्धुमलं हि तत्त्वम् ।
हास्यो भवामि करणेन निबन्धनस्य
स्पष्टं तथापि खलु चोदयतीह भक्तिः ॥

दुर्ज्ञेयानि बहूनि मन्दमतिभिस्तन्त्राणि गौरीपते-
रुद्गीर्णानि मुखाम्बुजादविकलास्त्वेकत्र तेषां क्रियाः ।
नोक्तास्तेन शिवागमांश्च सकलानुद्वीक्ष्य तास्ताः क्रियाः
संक्षिप्य प्रवदामि याश्च विहिता लिङ्गप्रतिष्ठाविधौ ॥

End :

सर्वभूतेभ्यो रुद्रपार्षदेभ्यो नमः । बलिवदनप्रायश्चित्त.. ।

मुत्पाभेषु (?) विनायकाश्रयवशादन्येषु विघ्नेष्वपि
प्राप्तेषूग्र(वि?)रुजामिषु प्रशमनं तेषां च सम्पत्करम् ।
जीर्णोद्धारविधौ विशेषविहितं तस्यापि वक्ष्ये विधिं
तारं वह्नितुरीयपार्थिवमहामायादि... ... ॥

Colophon :

इति प्रयोगमञ्जर्यां स्नपनपटलो विंशतिः ।

Author—Ravi, Son of Aṣṭāmūrti.

Remarks—The Ms. extends up to a fragment of the 21st *paṭala*. The leaves are much damaged.

The following verses :

भक्त्या पदाम्बुजसमर्पितया मगारे-
स्त्रैलोक्यसृष्टिविलयस्थितिकारणस्य ।
आराधितस्य सुचिरेण गुरोः प्रसाद-
लाभेन च क्षपितविश्वमनोमलेन ॥

शिवपुरसद्ग्रामभुवा विध्यर्पितसोमपानशुद्धेन ।
काश्यपगोत्रप्रभुणा माठरकुलाब्जवनहंसेन ॥

चम्पतटाकतीरारामस्थशास्तृगुप्तेन ।
प्रथितभवत्रातकुलध्वजभूतेनाष्टमूर्तिभुवा ॥

रविणा हरपादाब्जभृङ्गेण रचिता कृतिः ।
प्रयोगमञ्जरी नाम संक्षेपकुसुमोज्ज्वला ॥

occurring in a transcript of this work preserved in the Curator's Office Library, Trivandrum, disclose that the author was the son of Aṣṭamurti, that he performed many holy sacrifices and that he was residing at Trichur.

॥ प्रयोगसारः ॥

1111. PRAYOGASĀRA.

Substance—Palm leaf. Size—15½″ × 2½″. Leaves—114. 9—11 lines per page and 48—56 letters per line. Script—Malayāḷam. No. of Granthas—3750. Complete.

Subject—Exposition of *Tantrasāra*.

Beginning :

मायामौलिप्रबुद्धा प्रणवनवमुखी... ...त्रा
हस्तोद्यद्योगसांख्या स्तनभरविलसत्कल्पशिक्षासनाथा ।
छन्दोमध्या निरुक्तप्रकटितजघना न्यायतर्कान्वितोरू-
राख्यानाख्यापुराणस्मृतिनुतचरणा भारती वः पुनातु ॥

आदौ प्रणम्य सर्वज्ञान् गुरूनाज्ञाप्रबोधकान् ।
प्रयोगसारं वक्ष्यामि नानाविज्ञानसाधनम् ॥
तन्त्रसारं समालोच्य स्वसामर्थ्यानुरूपतः ।
बालानां बोधसिद्ध्यर्थं क्रियते सारसङ्ग्रहः ॥

End :

शुभग्रहाधिष्ठितदिक्षु सर्वं
शुभोदये चापि सुभोजनं फलम् ।
अतोऽन्यथा चेत् फलमन्यदुच्चकै-
र्विमिश्रके चापि विमिश्रितं फलम् ॥

इति शास्त्रवशाद् विविच्य मार्गं
शकुनानीह विचिन्त्य कीर्तितानि ।

अमुनैव शुभाशुभं विदित्वा
तदधीनं विदधीत कार्यजातम् ॥

पूज्यासितोक्तप्रवरेण यत्नाद्
गोविन्दनाम्ना रचितो हिताय ।
स्थेयादयं ख्यातिमवाप्य लोके
प्रयोगसारः सदनुग्रहेण ॥

Colophon :

इति प्रयोगसारे सप्तविंशः पटलः ।
सरस्वत्यै नमः । गणपतये नमः । ओं नमश्शिवाय नमः ।
नमामि देवदेवेशं कृष्णं कमललोचनम् ।
चतुर्भुजमुदाराङ्गं पीतवाससमच्युतम् ॥

Author—Govinda.

Remarks—The Ms. is much worn out. It comprises only 27 *patalas*.

॥ प्रयोगसारः ॥

1112. PRAYOGASĀRA.

Substance—Palm leaf. Size—9″ × 1½″. Leaves—25. 7—9 lines per page and 24—28 letters per line. Script—Malayāḷam. No. of Granthas—375. Incomplete.

Subject—Same as No. 1111.

Beginning :

अथ सन्तानसिद्ध्यर्थं प्रवक्ष्यामि चिकित्सितम् ।
तत्राधारः स्त्रियः प्रायस्तासु कार्या ततः क्रिया ॥

दैवदोषग्रहग्रस्ता स्त्रियो वन्ध्या भवन्ति हि ।
ऋतावृतौ परीक्ष्यास्ता वक्ष्यमाणैस्तु लक्षणैः ॥

दृष्टार्तवा नष्टफला हि वन्ध्या
सकृत्प्रसूता च मृतप्रजा च ।
यथोक्तहेतूपहतासु तासा-
मन्त्यैव दोषेतरहेतुदुष्टा ॥

बालाहारचेष्टाया बाते योनिमुपाश्रिते ।
योनिः सशब्दरुक्फेनतनुरूक्षारुणार्तवा ॥

End :

भावनामात्रसन्तुष्टा बालकं पान्तु सर्वदा ।
भूलोके च भुवर्लोके स्वर्लोके याश्च मातरः ॥
अधश्चोर्ध्वे च तिर्यक् च क्रीडनयोऽन्तमूर्तयः ?) ।
प्रसन्ना योगसम्पन्ना दिव्यैश्वर्यसमन्विताः ॥
स्वच्छन्दपदसम्भूतैर्भैरवैः परिवारिताः ।
रक्षन्तु बालकं प्रीताः शान्ताः शान्तेन चेतसा ॥
दिव्यं स्तोत्रमिदं पुण्यं बालरक्षाधिकारकः ।
जपेत्सन्तानरक्षार्थं सर्वद्रोहोपशान्तिदः ।

Colophon :

इति प्रयोगसारे तृतीयः पटलः ।

Author—Same as No. 1111. Govinda.

Remarks—The Ms. abruptly breaks off on a fragment of the 3rd *patala*.

॥ प्रासादालङ्कारलक्षणम् (भाषाव्याख्योपेतम्) ॥

1113. PRĀSĀDĀLAṄKĀRALAKṢAṆAM with Malayāḷam commentary.

Substance—Palm leaf. Size—6½″ × 1½″. Leaves—27. 5—7 lines per page and 18—22 letters per line. Script—Malayāḷam. No. of Granthas—200. Incomplete.

Subject—Details regarding the construction of mansions.

Beginning:

हरिः श्रीगणपतये नमः । अविघ्नमस्तु ।

ഗ—സ—നമഃ ।

ഇവിടേ കരു ശ്ലോകംകൊണ്ടു ചികീർഷിത പ്രതിജ്ഞയേ ചെയ്യുന്നു.

अथातः सम्प्रवक्ष्यामि यथावदनुपूर्वशः ।
यथा प्रासादालङ्कारं प्रस्तरोत्तरमध्यतः ॥

അനന്തരം വടിമേൽ പായോടുത്തരകീഴ്പ്പാ.....ടിടെക്കുള്ള പ്രാസാദാലംകാരം യാതൊരു പ്രകാരം അതിനേ ഉള്ള വണ്ണം പറയുന്നുണ്ടഥ.

ഇനി അരശ്ലോകംകൊണ്ടു ഇതിന്ന കടകക്ഷണമെന്ന പേരന്നു ചൊല്ലുന്നു.

कटकभूषणमित्येवं तन्मुनिज्ञैस्तदुच्यते ।

End:

പ്രാസാദത്തുങ്കലും അല്പഗോപുരത്തിങ്കലും.....ക്കുന്നു. അരത്തെയാവുയെന്നു താല്പര്യം. ഇങ്ങനേ ആചാര്യവര്യനായിരു.....
.....ശകമ്മാവിനാൽ പഞ്ജരലക്ഷണം ചൊല്ലപ്പെട്ടു.

Colophon :

इति विश्वकर्मकृतकटकभूषणविशेषं नाम... ...एञ्चर.....
लङ्कारोऽध्यायः । हरिः । श्रीगुरुभ्यो नमः ।
ഇത കൈയ്യെ... ... ...

हरिः । हरिः ।

Author—Text—Viśvakarmā.

Remarks—It is evident from the colophon that the work forms a part of the Kaṭakabhūṣaṇa a treatise on architecture by Viśvakarmā. A transcript of the Kaṭakabhūṣaṇa with Malayāḷam commentary is noticed on p. 5696, TCM. Vol. IV, Part I, Skt. C.

॥ भानुमतम् (लिङ्गशास्त्रम्) ॥

1114. BHĀNUMATAM.

Substance—Palm leaf. Size—10″ × 1½″. Leaves—7. 9 lines per page and 40—44 letters per line. Script—Malayāḷam. No. of Granthas—175.

Subject—A disquisition on the origin, consecration etc. of Liṅgas (idols).

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नेन परिसमाप्तिरस्तु ।
लिङ्गोद्भवं प्रवक्ष्यामि यथावदनुपूर्वशः ।
एकमूर्तित्रयोभागमेकरूपं निरामयम् ॥

अदर्शनमश्रवणं दृष्टादृष्टं परापरम् ।
भूतलेषु महत्कृत्वा रुद्रलोके प्रमोदते ॥
परमं वैष्णवं सिद्धं वैदिकं श्रीनिकं? तथा ।
पौष्टिकं कीर्तिमाप्नोति तस्मात्स्थावरमिष्यते ॥
चतुरश्रं ब्राह्मिकालिङ्गमष्टाश्रं वैष्णवं तथा ।
द्व्यष्टाश्रं भास्करं नाम दीर्घाश्रं कालभद्रकम् ॥

End :

यत्र त्रिंशतिभागं वा एकविंशतिभाग? वा ।
एवं षण्णवतीभागमेवकांशे वामभागतः ॥
तन्मध्ये स्थापनं प्रोक्तं सूत्रं प्रदक्षि. . . .भवेत् ।
पश्चाद्धरहरिस्थाप्यमुमामङ्गममिष्यते ॥
षडंशे पदमध्येषु वीरभद्रेश्वरस्य तु ।
सप्तांशे पदमध्येषु महेश्वरश्च म म उच्यते ? ॥
पञ्चादश (?) पदमध्येषु. . . . . .

Colophon :

इति भानुमते लिङ्गशास्त्रे लिङ्गस्य लक्षणं षष्ठोऽध्यायः ।

Author—Bhānu.

Remarks—The work aims at showing the method of casting *lingas* of Brahma etc. With the fragment of the 7th chapter it comes to a close. The leaves are old and damaged. It seems that the *Bhānumatalingaśāstra* noticed on p. 405, CC. is identical with this work.

॥ भानुमतम् (लिङ्गशास्त्रम्) ॥

1115 A. BHĀNUMATAM.

Substance—Palm leaf. Size—14½″ × 1¼″. Leaves—3. 12 lines per page and 64—70 letters per line. Script—Malayāḷam. No. of Granthas—150.

Subject—Beginning—Same as No. 1114.

End:

तत्तत्पदेन संयुक्तं तत्र लिङ्गं प्रयुज्यते ।
एकविंशसमायुक्तं वैश्यानां लिङ्गमिष्यते ।
वर्धमानमिति प्रोक्तं स्थावरमिति विद्यते ।
चतुष्पष्टिसमायुक्तं शूद्राणां लिङ्गमुच्यते ।
वर्धमानं तथा कुर्यात् सर्ववर्णेषु योजयेत् ।
आदिप्रमाणमेवं स्यात् परिवृते लिङ्गमिष्यते ।
पादोन ... ...

Colophon:

इति भानुमते लिङ्गशास्त्रे लिङ्गद्वारलक्षणः पञ्चमोऽध्यायः ।

Author—Same as No. 1114.

Remarks—The Ms. is fairly accurate.

॥ मनुष्यालयलक्षणम् (भाषामिश्रम्) ॥

1115 B. MANUṢYĀLAYALAKṢAṆAM.

Substance—Palm leaf. Size—14½″ × 1¼″. Leaves—4. 10 lines per page and 60 letters per line.

Script — Malayāḷam. No. of Granthas—150. Incomplete.

Subject—Architecture.

Beginning:

हरिः । श्रीगणपतये नमः ।

मनुष्यालयस्थानम् ।

किञ्चिदुक्ष्ये मनुष्याणामालयस्य तु लक्षणम् ।
शङ्कुस्थापनमारभ्य सूत्रज्ञानादि कर्म च ।
गृहं चिकीर्षुर्यत्नेन चतुरश्रां भुवं समाम् ॥
विधाय मध्ये शङ्कुञ्च स्थापयेच्छिल्पिपुङ्गवः ॥
यत्र शङ्कुः स्थितो मध्ये ब्रह्मस्थानं तदीरितम् ।
पूर्वापरायतं मध्ये ब्रह्मसूत्रमिति स्मृतम् ।
याम्योत्तरायतं यत्तु यमसूत्रं तदीरितम् ।
ईशरक्षोदिशायामं कर्णसूत्रं विदुर्बुधाः ॥

End:

आसनस्वागते साध्यं पाद्यमाचमनीय(च?कम्) ।
मधुपर्काचमं स्नानं वसनाभरणानि च ॥
सुगन्धसुमनो (भूमः?धूपो) दीपं नैवेद्यवन्दनम् ।
प्रयोजयेदर्चनायामुपहारांस्तु षोडश ॥

കഴപ്പലകയ്ക്കു നാൽവിരൽ. കുളത്തിൻറ കണ്ണമഞ്ഞു തോതു നീളം അഞ്ചുവിരൽ ഒരെ-തൊത-കോടി തോതു അഞ്ചു വിരൽ ഒരെ തോരനീളം കൊടാവണ ആറു വിരൽ. രണ്ടാമതു ആറുവിരൽ. മൂന്നാമതു് ഒരെ വിരൽ. ഇതു തോതു നീളങ്ങൾ-മൂന്നരപ്പന്തിക്കു്-മൂന്നു കഴക്കോൽ.

Author: Sankaradatta. See 1117.

Remarks—This work is noticed on p. 428 in CC.

॥ भावदीपिका (मुकुन्दयजनक्रमदीपिकाटीका) ॥

1116. BHĀVADĪPIKĀ.

Commentary on Mukundayajanakramadīpikā.

Substance—Palm leaf. Size—$7\frac{1}{2}'' \times 2''$. Leaves—100. 7—12 lines per page and 24—34 letters per line. Script—Malayāḷam. No. of Granthas—1600.

Subject—Worship of *Mukunda*.

Beginning:

हरिः । श्रीगणपतये नमः ।

मनस्यजस्रं मम सन्निधत्तां महो मनोज्ञं पुरुषोत्तमाख्यम् ।
श्रुतिश्रुतं संश्रितनीलशैलं जगत्त्रयीलोचनलोभनीयम् ॥

चलत्कुटिलकुन्तलं ललितमन्दलीलेङ्गितं
तरक्षुनखमण्डनं मधुरमुग्धहासाननम् ।
क्वणत्कनकनूपुरं रणितकिङ्किणीकङ्कणं
व्रजाङ्गणविभूषणं नमत नन्दगोपीसुतम् ॥

मातः सरस्वति सदैव दयार्द्रचित्ते
चातुर्यसारपरिनिर्मितकोमलाङ्गे ।
भीतं प्रबन्धरचनाध्वनि नः प्रबन्धुं
चेतः प्रबोधय कृताञ्जलिरर्थये त्वाम् ॥

सुमनसामपि यत्करुणामृते
विविधसाधनता विफला भवेत् ।
तमुरुविघ्नत(मा?म)स्तरणिं भजे
गजमुखं निजवाञ्छितसिद्धये ॥

प्रज्ञाकुमुदवनेन्दुं दिगङ्गनागीयमानगुणनिचयम् ।
प्रज्ञानगिरियतीन्द्रं भूयो भूयो नमस्यामः ॥

आलीढवेणुमरुणाधरपल्लवेन
गोपाङ्गनाप्रणयिनं प्रणिपत्य कृष्णम् ।
सत्सम्प्रदायसरणीमनुसृत्य कुर्वे
व्याख्यां मुकुन्दयजनक्रमदीपिकायाः ॥

प्रचिकीर्षितस्य प्रबन्धस्याविघ्नेन परिसमाप्तिप्रचयगमनाभ्यां शिष्टाचारपरिपालनाय विशिष्टमन्त्रदेवतास्वरूपानुस्मरणपूर्वकमाशीर्लक्षणमङ्गं संपादयन्नर्थाच्चिकीर्षितस्य प्रबन्धस्य मन्त्रदेवतारूपं विषयं तेन प्रतिपाद्यप्रतिपादकत्वलक्षणं संबन्धं दर्शयति कलेति ।

End :

खण्डिताः लोके तयोनम? तथा अघाद्दोपादपेतोऽपगतः स चासावात्तमायश्च तम् । वधः कृतांशशत्रूणां कार्यविमर्दनं भुक्त्याद्यैर्येन तं भुक्तद्युक्तं(?)वन्धो यथार्गलत्रिकमेकनाभिकं विभिन्नदिशाग्रं विलिख्यार्गलारूढा वृत्ताकारा नववीथीर्विलिख्य क्रमेणार्गलानां त्रयाणां कोष्ठेषु वर्णशः श्लोकस्य पदत्रयन्नाभिगदशमवर्णं विलिख्य चतुर्थपादमाद्यन्तैकवर्णमन्त्यवीथ्यामर्गलाग्रकोष्ठे.....

Colophon :

इति भावदीपिकायामष्टमः पटलः ।

Author—Nityaprajña.

Remarks—The title herein given is based on the Revised Catalogue, MPL, Trivandrum. The Ms. breaks off in the middle of the 9th *patala*.

Bhāvadīpikā, a work on Tantra is noticed on p. 407, CC. It elucidates *Kramadīpikā*, a treatise on *Gopālamantra*. (Vide p. 132, CC.) It is therefore evident that Bhāvadīpikā and this Ms. are identical works.

॥ मनुष्यालयचन्द्रिका ॥

1117. MANUṢYĀLAYACANDRIKĀ.

Substance—Palm leaf. Size—7½″ × 2″. Leaves—35. 12 lines per page and 23 letters per line. Script — Malayāḷam. No. of Granthas—500.

Subject—Same as No. 1115 B.

Author—Aruṇadatta: (Vide p. 428, CC.)

Remarks—The work is a symposium of several treatises on *Tantra*. The methods of constructing buildings and sinking wells are set forth herein in a lucid diction. It is published as No. 56 in the TSS. The following verse indicating certain measurements is cited at the end:

"ഇഷ്ടദീർഘമതുദ്വിഘ്നം തൽത്രിഭാഗസമന്വിതം.
ഇഷ്ടയൊന്നെസ്ത്രിഭാഗംച കൂട്ടിനാലതു മുറുപോൽ"

॥ मनुष्यालयचन्द्रिकासंग्रहः (भाषाव्याख्यायुतः) ॥

1118. MANUṢYĀLAYACANDRIKĀSAṄGRAHA with Malayāḷam commentary.

Substance—Palm leaf. Size—6″ × 2″. Leaves—42.

11 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas—700. Incomplete.

Subject—Same as No. 1115 B.

Beginning :

.. ചതുഖണ്ഡങ്ങളുംകൂടി ഒന്നാക്കി ബ്രഹ്മപദം കല്പിച്ചു അതിന്റെ പുറമെ ആറാറു ഖണ്ഡങ്ങളെക്കൊണ്ടു ഓരോ പദങ്ങൾ കോണുകളിലെ നന്നാലു നന്നാലു ഖണ്ഡങ്ങളിലും ഈ രണ്ടു ഖണ്ഡങ്ങൾ കൂടീട്ടു ഈ രണ്ടു പദങ്ങൾ ഇങ്ങിനെ 13 സ്ഥാനങ്ങൾ. പിന്നെപ്പുറമെ ഓരോരോ ഖണ്ഡങ്ങളായി മുപ്പത്തിരണ്ടു സ്ഥാനങ്ങൾ ഇങ്ങനെ നാല്പത്തഞ്ചു. ഈ സ്ഥാനങ്ങളിലും ദേവതകൾ. ദേവതകളുടെ പേരുകൾ ചൊല്ലുന്നു—

ईशाद्यं बहिरावृति स्वपदकेष्वीशानपर्जन्यका-
वैन्द्रीन्द्रौ रविसत्यकौ भृशङ्गृहव्यादस्तथा पूषणः (?) ।
भूयो वै वितथं गृहक्षतयमौ गन्धर्वभृङ्गौ मृगः
पित्राख्यः प्रतिहारपालमपि सुग्रीवं क्रमात् कल्पयेत् ॥

End :

तन्मन्थितश्चोर्ध्वमधस्तदर्गळप्रमाणरूपाङ्कवलीः प्रकल्पयेत् ।
ऊर्ध्वार्गळं तत्र तु पुत्रिकागतं त्वधोऽर्गळं मातृकवाटसंस्थितम् ॥

അത്തഴുതകുറ്റിയുടെ രണ്ടു തലക്കലും വാതിലിന്മേൽ തെക്കോട്ടു തഴുതിടുവാൻ രണ്ടു് അടപ്പുണ്ടാക്കണം. ആ അടപ്പിന്റെ വിസ്താരം തഴുതിന്റെ വിസ്താരത്തോളമാം-അതിന്റെ താഴ്ച തഴുതിന്റെ കനത്തോളം അതിൻമേലെത്തഴുതു് വലത്തെ വാതിലിന്മേൽ കീഴെത്തഴുതു് ഇടത്തെ വാതിലിന്റെ മേൽവെപ്പു്.

कवाटविस्तारसमार्गळायतिर्यद्वा तदङ्घ्र्यूर्मिगजांशव ...

Colophon :

Author :

Remarks—A few leaves are missing both at the beginning and end.

॥ मनुष्यालयलक्षणम् ॥

1119. MANUṢYĀLAYALAKṢAṆAM.

Substance—Palm leaf. Size—$3\frac{1}{4}'' \times 2''$. Leaves—13. 13—15 lines per page and 14—16 letters per line. Script—Malayāḷam. No. of Granthas—175. Complete.

Subject—Same as No. 1115 P.

Beginning :

श्रीगणपतये नमः ।
प्रणम्य विश्वस्थपतिं पितामहं
निसर्गसिद्धामलशिल्पनैपुणम् ।
मया विविच्यागमसारमीर्यते
समासतो मानववास्तुलक्षणम् ॥

गोमर्त्यैः फलपुष्पदुग्धतरुभिश्चाढ्या समा प्राक्प्लवा
स्निग्धा धीररवा प्रदक्षिणजलोपेताशुबीजोद्भवा ।
सम्प्रोक्ता बहुपांसुरक्षयजला तुल्या च शीतोष्णयोः
श्रेष्ठा भूरधमा समुक्तविपरीता मिश्रिता मध्यमा ॥

End :

अन्तराळद्वयं तत्र कुडुम्बैर्दण्डशालकैः ।
सह्यपूर्वोत्तरे दक्षे पाण्ड्याश्चोळादिभूमिके ॥

ताम्रपर्णी च कावेरी गोदावरि सरस्वती ।
गङ्गे? च यमुनातीरे ब्राह्मणानां निवासकम् ॥
नीळागौणादितीरेषु ब्राह्मणैश्च विराजितम् ।
कुटुम्बैकं केरळेषु चतुश्शालाङ्कणैर्युतम् ॥
शुभमस्तु ।

Colophon :

Author : Nārāyaṇa of Cennas family

Remarks—The identity of the introductory verses denotes that this treatise and the one noticed on p. 8764, DCSM. Vol. XXII, are identical.

॥ मनुष्यालयलक्षणम् (सव्याख्यम्) ॥

1120. MANUṢYĀLAYALAKṢAṆAM with commentary.

Substance—Palm leaf. Size—$7\frac{1}{4}'' \times 1\frac{3}{4}''$. Leaves—42. 6—10 lines per page and 24—30 letters per line. Script—Malayāḷam. No. of Granthas—585.

Subject—Same as No. 1115 B.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।
गुरुजनचरणसरोरुहयुगलं मम मानसे सुविन्यस्य ।
अद्य चतुश्चत्वारिंशतिकान्वयमात्रमत्र लिख्येऽहम् ॥
अयं कविर्मया तन्त्रसमुच्चये देवालयलक्षणं समुक्तम् । मनु-

ष्यालयलक्षणं कुत्रापि नोक्तम् । तस्मादिदानीं तन्त्रसमुच्चयात् कतिपयपद्या(न्यधिनि य)थावकाशमुद्धृत्य तैः सह चतुश्चत्वारिंशद्भिः श्लोकैः मनुष्यालयलक्षणं वक्ष्यामीति निश्चित्य तत्रादौ प्रथमेन श्लोकेन इष्टदेवतानमस्कारं चिकीर्षितप्रतिज्ञां चाह—

प्रणम्य विश्वस्थपतिं पितामहं
निसर्गसिद्धाखिलशिल्पनैपुणम् ।
मया विविच्यागमसारमीर्यते
समासतो मानववास्तुलक्षणम् ॥

End :

ഈശഖണ്ഡമാംപോൽ ചെറുമയ്യ്യം പടിഞ്ഞാറെ പുരെടെ വടക്കെ കുറിയതിന്നു വടക്കു് അന്തരാളത്തിനു് ഒഴിയും. നിൎ൪തിഖണ്ഡമാംപോൽ ചെറുമയ്യ്യം പടിഞ്ഞാറെ പിരയിടെ തെക്കെകുറിയ ചിന്നതെക്കുമേക്കു് അന്തരാളത്തിൽ ഒഴിയും. ഇച്ചെറുമയ്യങ്ങൾക്കു മുട്ടാതെ ദ്വാരങ്ങളും വേണം. കണ്ണ്സൂത്രത്തിനു് ആൽ കടക്കുന്ന ദ്വാരംതന്നെ വേണം. ചെറുമയ്യ്യത്തിന്നെന്മാനില്ല. മറെറവയോ മുട്ടകയില്ലല്ലൊതാനും-അതോ മുട്ടകിൽ അപത്തു്—ശുഭം.

Colophon :

इति मानवसमुच्चयं समाप्तम् ।

Author—Nārāyaṇa. of Cennas family

Remarks—The introductory portion of the commentary discloses that the author of the original was none but Nārāyaṇa who composed Tantrasamuccaya and who flourished during the former half of the 15th century A. D. The closing two leaves deal with the following topics on *Silpa* :

हरिः । मट्टमष्टाङ्गुलं प्रोक्तं मूलविस्तारमायतम् ।
अग्रविस्तारुद्राङ्गे सार्धवेदपडंशके ॥

मध्यसूत्रस्य पार्श्वे तु अङ्कयित्वात्र सूत्रकम् ।
अग्राच्छिखरमायामं सार्धवेदषडंशकैः ॥
तत्कर्णौ पार्श्वसूत्रान्तौ कर्णयोरन्तरं तृ(?)जेत् ।
एवं मट्टशिखाद्वयं रचनामत्स्यपुच्छवत् ॥
मूलविस्तारमष्टांशं मूले वाजनमीरितम् ।
निर्गमं वाजनस्यार्धं भुजाकोटिप्रमाणतः ॥
वाजनाद्ग्रपर्यन्तं गळं फलकसंज्ञितम् ।
वाजनार्धघनं प्रोक्तं शिखरौ फलकलक्षणम् ॥
बल्यर्चा चोत्सवार्चा च तीर्थयात्रार्चना तथा ।
स्नापोत्थानार्चना चेति चतस्रश्चैकवेरके ॥
कर्मार्चा स्नपनार्चा च बहुवेरेऽधिकं द्वयम् ।
षण्णां प्रतिकृतीनां तु बहुवेरैकवेरयोः ॥
सुवर्णं रजतं ताम्रं मणयः कांस्यमेव च ।
मृत्तिकादारुपाषाणैरित्यष्टौ योनयः स्मृताः ॥
सौवर्णं पुष्टिदं बिम्बं कीर्तितं रजतोद्भवम् ।
ताम्रजं पुत्रधनदं सौख्यदं मणिजं स्मृतम् ॥
कांस्यजं पापशमनं मृन्मयं सर्वकामदम् ।
लक्ष्मीप्रदं दारुभवं शैलमायुर्बलप्रदम् ॥
आ... ...पदञ्चान्यद् बिम्बमस्ति सुधामयम् ।
कर्त्तव्या मणिलोहाभ्यां जं... ...मा प्रतिमा बुधैः ॥
खट्वारुद्रवितस्तिदीर्घमहिता तुर्यांशविस्तीरिता
भित्तिः सार्धवितस्तिकाममतला पादान्तरब्रह्मभिः ।
भित्त्यर्धाङ्गुलनिर्गमा दृढतरा शीर्षप्रदेशोन्नता
हस्तोच्छ्रायपदा तदर्धचरणा भूयाच्छिरः पादयोः ॥
पुन्नागाम्रसुरद्रुमप्रभृतिभिर्वात ... वृक्षैः कृता ।

देवदारुबकुलपुन्नागाशोकाम्रखदिरामनकपित्थनिम्बजम्बूदुम्बर-चम्पकचन्दनवत्सलडोळाभिपूकान्यतमं निश्छिद्रं सारवन्तं हस्त-चतुष्कायामं द्वात्रिंशदङ्गुलविस्तारं हस्तमात्राभित्तिसोपानं स्नेहग-मनसारं बहिर्भागे पाददेशे अष्टाङ्गुलगोमुखायामं हस्तोन्नताशिरो-भागपादयुगलं पाददेशे तदर्धमात्रं कृतां धाराशिविकां प्रश-स्तामाहुः । ओं ।

ആയതിനു ചതുരശ്രുത്തിനു കണ്ടും തന്നേറ ആയാമംകൊണ്ടു് എട്ടിട്ടെഴും വിസ്താരത്തിൽ പാതിയും കൂടിയതു കണ്ടുനീളും സൂക്ഷ്മമായിവരും.

॥ मनुष्यालयलक्षणम् ॥

1121 A. MANUṢYĀLAYALAKṢAṆAM.

Substance—Palm leaf. Size—$7\frac{3}{4}'' \times 2\frac{1}{8}''$. Leaves—5. 9 lines per page and 30 letters per line. Script—Malayāḷam. No. of Granthas—95.

Subject—Same as No. 1115 B.

Beginning—Same as No. 1119.

End :

कुर्यान्प्राङ्मणतो गमागमकृते द्वारं महत् पादुके
हस्तैर्वाङ्गुलकैः प्रकल्पितशुभायाद्यप्ररूढोत्तरम् ।
स्वारामप्रविभक्तरुद्रदशनन्देशांशविस्तारतन्-
खण्डोत्पन्नघनाङ्घ्रियुग्मविलसन्मङ्गल्यपट्यादिकम् ॥

दण्डेनावासभूमौ ग्रहणमिव करेणैव गेहस्य कुर्याद्
द्वारादेर्मुष्टिनोलूखलशयनघटप्रस्थवंशोङ्गुलैर्वा ।

यावीया नूपुराद्यास्तथवसुयपकं त्वङ्गुलं तात्त्रिकं स्या-
न्मुष्टिर्हस्तोऽष्टमुष्टिर्निगदितमृषिभिर्वेदहस्तोऽत्र दण्डः ॥

ओं विश्वकर्मणे नमः । शुभमस्तु ।

हरिः हरिः ।

Author: Nārāyaṇa of Cennās family.

Remarks—Same as No. 1119.

॥ मनुष्यालयलक्षणम् (भाषाव्याख्योपेतम्) ॥

1121 B. MANUṢYĀLAYALAKṢAṆAM

with Malayāḷam commentary.

Substance—Palm leaf. Size—$7\frac{3}{4}'' \times 1\frac{1}{8}''$. Leaves—25. 9 lines per page and 28 letters per line. Script —Malayāḷam. No. of Granthas—400.

Subject—Same as No. 1115 B.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

प्रणम्य विश्वस्थपतिं पितामहं
निसर्गसिद्धाखिलशिल्पनैपुणम् ।
मया विचिच्यागमसारमीर्यते
समासतो मानवचास्तुलक्षणम् ॥

വിശ്വത്തെ മുഴുവനെച്ചമെക്കുന്ന ആശാരിയായി എല്ലാ റെയുമഴകുതായി ച്ചമയ്ക്കുന്നെടത്തെ വൈദഗ്ധ്യം സ്വാത

ഉണ്ടായിരിക്കുന്ന ബ്രഹ്മനെ നമസ്കരിച്ചിട്ട് വാസ്തുലക്ഷണങ്ങൾ ചൊല്ലുന്ന മൂലാഗമങ്ങളിലെ സാരത്തെ വിചാരിച്ചു എന്നാൽ മാനവവാസ്തുലക്ഷണം ചുരുക്കി ചൊല്ലപ്പെടുന്നു — അവിടെ പിരിചമെപ്പാൻ നല്ല ഭൂമിടെ ലക്ഷണം ചൊല്ലുന്നു.

End:

ഇതിന്നു നാലു പുരേടയും പുറത്തെ ഉത്തരങ്ങൾ നീട്ടി തങ്ങളിൽകൂട്ടി ഒരു ചതുരശ്രം അകത്തെ ഉത്തരങ്ങൾ കൂട്ടീട്ടും ഒരു ചതുരശ്രമവരണ്ടും മുറവും ദിഗ്ഗ്രഹങ്ങളുടെ പുറത്തെ ചുറും കോണഗ്രഹങ്ങളുടെ അകത്തെചുറും ഏകയോനിയായിരിക്കണം.

पर्यन्तध्वजमादधीत चतुरश्रं मध्यतश्चाङ्कणं
तत्पार्श्वेऽप्यतिपत्रमानमपरं चाभ्यन्तरं केतनम् ।
तत्तुर्यश्रयुजोत्थकोणचतुरश्रेषूत्तरान्तर्ध्वजं
युक्त्या तूत्तरविस्तृतिश्च जनयेत्तुर्यश्रशालाविधौ ॥

Author: Nārāyaṇa of Cennas family

Remarks—The Ms. breaks off at the end. A leaf following the close of the work deals with *Gaṇita*, and the next, the details regarding *Mahāprāsāda*. The following eight leaves are blank and the last two furnish some information on medicine etc.

॥ मनुष्यालयलक्षणम् (भाषाव्याख्योपेतम्) ॥

1122. MANUṢYĀLAYALAKṢAṆAM
with Malayāḷam commentary.

Substance—Palm leaf. Size—8½" × 1½". Leaves—43.

8 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas—576. Incomplete.

Subject—Same as No. 1115 B.

Beginning—Same as No. 1121 B.

End:

അംകോലം അംഗങ്ങിൻ തപിലിപം എന്ന പടിയയ്യേ സാമാന്യമേറപ്പറഞ്ഞു തായം വ്യതിപദം=വെലിത്തരി-ശ്ലേഷ്മാതകനുവരി. പീലു=ഉക. കോദ്രവം=വരകു. നിഷ്പാവം തുവര. തലീപമെന്നു് അതുക്കല്ലും പടിയും ചൊല്ലാം.

पृथुं सुवृत्तं मसृणं वितस्ति-
मात्रोन्नतं कननीखनर्यशंकुम् (?)।
आक्रम्य पद्भ्यामितरेतरात्त-
हस्तभ्रमोऽयं खलु राजगोष्ठी ॥

हरिः— നാഴിതോറുമദ്ധ്യാംഗുലമാറുമാസം
നാഴ്വാടിയന്ത്യന്തമിറങ്ങുമെന്നാൽ
മേഷാന്തമേറും വൃഷഭാദിമീളം
കഴ്വാടിദക്ഷോത്തരമേവസൂഷ്വഃ.
ഇതുദിക്കുമറിയുതീപ്പാൻ.

Colophon:

Author: Nārāyaṇa of Cennār family

Remarks—The Ms. points out the characteristics of *Bhitti* and *Stambha* explaining as it does the Sanskrit technical terms with corresponding Malayāḷam equivalents.

॥ मयमतम् (द्राविडभाषाव्याख्योपेतम्) ॥

1123. MAYAMATAM
with Tamil commentary.

Substance—Palm leaf. Size—19" × 2". Leaves—168.
8—10 lines per page and 56 letters per line.
Script—Malayāḷam. No. of Granthas—5500.

Subject—Same as No. 1115 B.

Beginning:

प्रणम्य शिरसा देवं सर्वज्ञं जगदीश्वरम् ।
तं पृष्ट्वा ... ... ॥
मुनिर्मयः कर्ता सर्वेषां वास्तुलक्षणं (कर्मणाम्) ।

இதினுடைபொருள் இங்ஙகேபிரகாரம் சொல்லின்றிது

सर्वेषां वस्तुकर्मणां कर्ता प्राज्ञो मुनिर्मयः सर्वज्ञं जगदीश्वरं देवं शिरसा वन्द्य प्रणम्य तं पृष्ट्वा तस्मादलं श्रुत्वा तैतिलानां मनुष्याणां वस्त्वादीनां सुखोदयं शास्त्रं यथाक्रमं शास्ति

End:

षडङ्गुलान्तमुत्सेधं पूजान्तं कन्यसं मतम् ।

ஒருவிரல் துடங்கி ஆறுவிரலளவும் ஒவ்வொரு விரலிலேற்றிக்கொள்க. இந்த பிரமாணக்கை அதமலிங்கத்தில் பூஜாபாகமென்றறிவான்.

सप्ताङ्गुलं समारभ्य यावद् द्वादशमात्रकम् ।
पूजाभागोदयं लिङ्गे मध्यमे तं प्र ... ... ॥

Colophon:

इति मयमते वास्तुशास्त्रे चतुर्गृहविधानं नाम सप्तविंशोऽध्यायः । हरिः ।

Author—Maya.

Remarks—The first 27 chapters are extant in the Ms. without any break. Then commence chapters, 33 and 34 which are incomplete. The work comes to an end with *Lingalaksana*. The leaves are extremely damaged. The text alone is printed as No. 65 in TSS. R. No. 13034, TCM. Vol. 22, consisting of 36 chapters is identical with this work.

॥ मयमतम् (द्राविडभाषाव्याख्योपेतम्) ॥

1124. MAYAMATAM
with Tamil commentary.

Substance—Palm leaf. Size—13½″ × 2″. Leaves—14. 9—11 lines per page and 34 letters per line. Script—Malayāḷam. No. of Granthas—300.

Subject—Same as No. 1115 B.

Beginning—Same as No. 1123.

End :

रसमुनिवसुभागे वृत्तकेऽष्टाश्रकेऽजे
परिधिरथ नवांशे लिङ्गतुङ्गे च भूयः ।
त्रिभिरपि गुणभागैः सुत्रिभिस्तुङ्गमानं
ह्यजहतहरभागं यत्तु त्रैराशिकं स्यात् ॥

Colophon :

शिवलिङ्गलक्षणम् ।

Author—Same as No. 1123.

Remarks—The Ms. comes to an end with a fragment of the 7th chapter.

॥ मुकुन्दयजनक्रमदीपिका ॥

1125. MUKUNDAYAJANAKRAMADĪPIKĀ.

Substance—Palm leaf. Size—9″ × 2½″. Leaves—58. 9—11 lines per page and 30 letters per line. Script—Malayāḷam. No. of Granthas—1000.

Subject—Same as No. 1116.

Beginning:

कलाक्तिमायालवकात्तमूर्त्तिः कळक्कणद्वेणुनिनादरम्यः ।
..... दिव्याकुलयंस्त्रिलोकीं श्रियेऽस्तु गोपीजनवल्लभो वः ॥

गुरुचरणसरोरुहद्वयोत्थान्
महितरजःकणकान् प्रणम्य मूर्ध्ना ।
गदितमिह विविच्य नारदाद्यै-
र्यजनविधिं कथयामि शार्ङ्गपाणेः ॥

क्षितिसुरनृपविट्तुरीयजानां
मुनिवनवासिगृहस्थवर्णिनां च ।
जपहुतयजनादिभिर्मनूनां
फलति हि कश्चन कस्यचित् कथञ्चित् ॥

End:

यावन्मनो विलयमेति हरेरुदारं
मन्दस्मिते ह्यस्तुतावदनंगलीन्दुम् ।

अष्टादशार्णमथवा दशवर्णकं वा
मन्त्रं शनैरथ समायतमातरिश्वा ॥
आरोप्यारोप्य मन्त्रं पदारविन्दादिमन्दहसितान्तम् (?)।
तत्र विलोप्य क्षीणे चेतसि सुखचित्सदानन्दकेकागानाम् (?) ॥
दीपिकयोद्भावयवोद्भास्यते कर्म कृष्णमन्त्रगणकलितानाम् ।
संशयतिमिरच्छिदुरा सैषा क्रमदीपिकाकरणे ॥
महद्भिः कारदीपि ... ... स्नेहमहर्निशम् ।
समस्तसुखाप्त्यै ... ... ॥

Colophon :

इति श्रीमत्क्रमदीपिकायां सप्तमः पटलः ।

Author :

Remarks—The Ms. contains the first seven *patalas* and a fragment of the 8th.

॥ मुकुन्दयजनक्रमदीपिका ॥

1126 A. MUKUNDAYAJANAKRAMADĪPIKĀ.

Substance—Palm leaf. Size—9″ × 1½″. Leaves—115. 5—6 lines per page and 26 letters per line. Script—Malayāḷam. No. of Granthas—1020.

Subject—Beginning—Same as No. 1116.

End :

जनमिम(म)?नुविद्धा येन यस्मिन् प्रसूते
यदनु ततमजस्रं पाति चाधिष्ठितायाम् ।

येदुरु मह उदार्चिर्यं विधत्ते च गोपि ?
तममृतसुखबोधज्योतिषं नौमि कृष्णम् ॥

Colophon :

इति श्रीक्रमदीपिकायामष्टमः पटलः । समाप्ता चेयं क्रमदीपिका । हरिः श्रीकृष्णाय नमः ।

Author :

Remarks—The Ms. is fairly accurate.

॥ कृष्णमन्त्रध्यानविधिः ॥

1126 B. KṚṢṆAMANTRADHYĀNAVIDHI.

Substance—Palm leaf. Size—9″ × 1½″. Leaves—11½. 5—7 lines per page and 25 letters per line. Script—Malayāḷam. No. of Granthas—100.

Subject—Mantric meditation on Lord Kṛṣṇa.

Beginning :

श्रीमहागणपतये नमः ।

गुरुं गणपतिं देवं प्रणम्य भगवत्तमान् ।
सुध्यानं कृष्णमन्त्रस्य संक्षिप्तं वक्तुमारभे ॥

सप्तप्रकृतिभिः सप्तसागरादिपरिष्कृते ।
या नातिवर्तितुं शक्या नरैर्भागवतोत्तमैः ॥
प्राकारैः सप्तभिस्तुङ्गैस्तदन्तरनिवेशिभिः ।
... ...राजद्भिः साङ्गवेदमयैरपि ॥
वेदवाक्यमयैर्द्वारैः श्रेयस्साधनगोचरैः ।

गोपुराद्यात्मसंस्थानवाक्यालङ्करशोभितैः ॥

End :

विभूतिवर्णने भक्त्या यज्जिह्वा चपलायते ।
एवमाश्चर्यविभवो द्वारकानिलयो हरिः ॥

सुषुम्नान्तस्समुद्योतं ज्योतिषां ज्योतिराकरम् ।
आप्याययन्निदं सर्वं व्याप्नुवन्न तमीयते ॥

हरिः श्रीकृष्णाय नमः ।

Author :

Remarks—A portion relating to the glorification of Ṛṣabhakṣetra is set forth on a Fol. at the close.

॥ रामरहस्यम् ॥

1127 A. RĀMARAHASYAM.

Substance—Palm leaf. Size—7″ × 1½″. Leaves—27. 7 lines per page and 24 letters per line. Script—Grantha. No of Granthas—275.

Subject—The modes of worshipping Śrī Rāma.

Beginning :

विदार्भितं तु तत्प्रोक्तं दुष्टघ्नं वश्यरक्षणम् ।
मन्त्रेणान्तरितं साध्यं समन्तात्तिष्ठते यदि ॥

आक्रान्तं तद्विजानीयात् सद्यस्सर्वार्थसिद्धिदम् ।
स्तोभस्तम्भसमावेशवश्योच्चाटनकर्मसु ॥

सकृन्पूर्वं वदेन्मन्त्रमन्ते चैव तथा पुनः ।
मध्ये चास्य भवेत् साध्यमाद्यन्तमिति तद्विदुः ॥
अन्योन्यप्रीतियुक्तानां विद्वेषणकरं परम् ।
आदौ चान्ते तथा मन्त्रं द्विवारं संप्रयोजयेत् ॥

End :

यः पृथ्वीभरवारणाय दिविजैः सम्प्रार्थितश्चिन्मयः
संजातः पृथिवीतले रघुकुले मायामनुष्योऽव्ययः ।
निश्शङ्कं हतराक्षसः पुनरगाद्ब्रह्मत्वमाद्यं स्थिरां
कीर्तिं पापहरां विधाय जगतां तं जानकीशं भजे ॥

हरिः । शुभमस्तु ।

Author :

Remarks—22 leaves are missing at the beginning. Only from the 23rd Fol. begin the *yantras* and the portion dealing with *Rāmarahasya* etc.

॥ हनुमत्स्तोत्रम् ॥

1127 B. HANUMATSTOTRAM.

Substance—Palm leaf. Size—7″ × 1¾″. Leaves—6. 6 lines per page and 17 letters per line. Script —Grantha. No. of Granthas—32.

Subject—A panegyric of Hanumān.

Beginning:

हनूमन्मन्त्रस्य ईश्वर ऋषिः । अनुष्टुप्छन्दः । हनूमान् देवता । ओं बीजम् । स्वाहा शक्तिः । हनूमत्प्रीत्यर्थे इष्टकाम्यार्थ-सिद्धयर्थे जपे विनियोगः। ओं अञ्जनासुताय हृदयाय नमः । रुद्रमूर्तये शिरसे । वायुपुत्राय शिखा, अग्निगर्भाय क(व)च, रामप्रियाय नेत्रे, ब्रह्मास्त्रनिवारणाय अस्त्राय ।

(ध्यानम्)

श्रीरामस्यैकदूतः पवनतनुभवः पिङ्गलाक्षः शिखावान्
सीताशोकापहर्ता दशमुखविजयी लक्ष्मणप्राणदाता ।
आनेता भेषजाद्रेर्लवणजलनिधेर्लङ्घने वायुवेगो
वीरः श्रीमान् हनूमान् मम मनसि हितं कार्यसिद्धिं विदध्यात् ॥

ओं नमो भगवते हनूमते स्वाहा । पश्चाद्विनियोगमनु षडङ्गं पूर्वं ध्यानम्

ध्यायेद्बालदिवाकरद्युतिनिभं देवारिदर्पापहं
देवेन्द्रप्रमुखप्रशस्तयशसं देदीप्यमानं रुचा ।
सुग्रीवादिसमस्तवानरयुतं सुव्यक्ततत्त्वप्रियं
संरक्ताननलोचनं पवनजं पीताम्बरालङ्कृतम् ॥

End:

संसारसागरावर्तगर्तसंभृतचेतसाम् ।
शरणागतमर्त्यानां शरण्याय नमो नमः ॥
राजद्वारे विलद्वारे ...वेशे भूतसंकुले ।
गजसिंहमहाव्या ... ... ननं ॥
शरण्यार्थी शरण्या च ... ... त ।
... ... प्रदोषे वा प्र ... तो वा ये ... ॥

... ... भम् ।
...सिद्धिं यशः कीर्तिं प्राप्नुवन्ति ... ... ॥
... प्रयाणे ... दिश तं तेषा ... ... ।
... ... तेजसे ॥
दुष्टदैत्यमहाद... ... ...
... ब्रह्मास्त्रस्तम्भनाय नमः श्रीरुद्र ... ॥
... ...जपेन्नरः ।
राजद्वारे ... ... प्राप्नुवन्ति जयं ध्रुवम् ॥
विभीषणकृतं स्तोत्रं यः पठेत् .... रः ।
सर्वापद्भ्यो विमुच्येत मुच्यते न विचारणा ॥

Colophon:

इति विभीषणकृतं हनुमत्स्तोत्रं समाप्तम् ।

Author—Vibhiṣaṇa.

Remarks—Descriptions of the *Hanumat Mantra*, bulk largely in the Ms.

॥ हनुमद्यन्त्रम् ॥

1127 C. HANUMADYANTRA.

Substance—Palm leaf. Size—7" × 1½". Leaves—5. 7 lines per page and 21—23 letters per line. Script—Grantha. No. of Granthas—50.

Subject—Yantra pertaining to Hanumān.

Beginning:

अथ यन्त्रं प्रवक्ष्यामि इष्टकार्यार्थसिद्धये ।
... ...समालिख्य त्रिकोणं वर्तुलं भ... ।

...ऊं पद्मं ततः पार्थिवमण्डलम् ।
तद्बाह्ये षोडशाब्जं स्याद् द्वात्रिंश.....युतम् ॥
चतुष्षष्टिदलोपेतं शोभनं वृत्तमुज्ज्वलम् ।
